स्थित होकर सात बार इस कवच का पाठ करे तो क्षय, अपस्मार, कुष्ठ तथा तिजारी ज्वर का अवश्य नाश होता है। रविवार के दिन जो पुरुष पीपल के नीचे इस कवच का पाठ करता है वह अचल लक्ष्मी तथा संग्राम में विजय प्राप्त करता है। जो इस कवच को लिखकर उसकी पूजा करता है वह सर्वत्र विजय प्राप्त करता है, तथा जो इस कवच को हाथ में धारण करता है वह लक्ष्मी को प्राप्त करता है। विवाद, जूएबाजी, राजकुल तथा रण में अल्पाहार-पूर्वक जितेन्द्रिय होकर जो रात्रि में दश बार इस कवच का पाठ करता है वह विजय प्राप्त करता है। तथा मनुष्यों में राजा होता है॥ ३१-३७ ॥

भूत, प्रेत से आविष्ट होने पर, महादुःख की अवस्था, रण, समुद्र में डूबने, अत्यन्त भयानक सिंह तथा बाघ से भय उत्पन्न होने पर, बाण तथा शस्त्रास्त्र से युद्ध की स्थिति में, सीकड़ से बँधने की

कायस्तोभे वह्निचक्रे क्षेत्रे घोरे सुदारुणे ॥ ३९ ॥
शोके महारणे चैव ब्रह्मग्रहविनाशनम् ।
सर्वदा तु पठेन्नित्यं जयमाप्नोत्यसंशयम् ॥ ४० ॥
भूर्जे वा वसने रक्ते क्षोमे वा तालपत्रके ।
त्रिगन्धेनाथ मश्यैव विलिख्य धारयेन्नरः ॥ ४१ ॥
पञ्च-सप्त-त्रिलोहैर्वा गोपितं कवचं शुभम् ।
गले कट्यां बाहुमूले कण्ठे शिरसि धारितम् ॥ ४२ ॥
सर्वान् कामानवाप्नोति सत्यं श्रीरामभाषितम् ॥ ४३ ॥

इति पण्डितशिवदत्तमिश्रशास्त्रिनिर्मिते हनुमद्-रहस्ये ब्रह्माण्ड-पुराणे नारदाऽगस्त्यसंवादे श्रीरामप्रोक्तं हनुमत्कवचं सम्पूर्णम् ।

स्थिति में तथा कारागार (जेल) जाने की स्थिति में, शरीर पीडा की स्थिति में, आग लगने की स्थिति में, अत्यन्त भयानक क्षेत्र (खेत) रक्षण की स्थिति में, शोक, महारण, ब्रह्मग्रह आदि में इस कवच का पाठ करने से ब्रह्मबाधा आदि समस्त दुःख दूर हो जाते हैं। जो सर्वदा इस कवच का पाठ करते हैं वे निश्चय ही विजय प्राप्त करते हैं ॥ ३८-४० ॥

भोजपत्र, वस्त्र, रेशमी लाल वस्त्र पर अथवा ताडपत्र पर इस कवच को त्रिगन्ध स्याही से लिखकर मनुष्यों को यह कवच धारण करना चाहिए ॥ ४१ ॥ पाँच, सात तथा तीन लोहे के भीतर रखकर गले, कटि अथवा बाहुमूल, कण्ठ या शिर में इस कवच को धारण करने से मनुष्य की समस्त कामनाएँ पूरी होती हैं। यह सचमुच ही श्री राम का कहा हुआ कवच है ॥ ४२-४३ ॥

इस प्रकार पण्डितशिवदत्तमिश्रशास्त्रिकृत हिन्दी व्याख्या सहित हनुमद्-रहस्य में ब्रह्माण्डपुराणोक्त नारद तथा अगस्त्य के संवाद में श्रीराम द्वारा कथित हनुमत्कवच सम्पूर्ण ।

पञ्चमुखहनुमत्कवचम् २.

अस्य श्रीपञ्चमुखहनुमन्मन्त्रस्य ब्रह्माऋषिः, गायत्रीच्छन्दः, पञ्चमुखविराट्हनुमान् देवता, ह्रीं बीजम्, श्रीं शक्तिः, क्रौं कीलकम्, क्रूं कवचम्, क्रैं अस्त्राय फट् । इति दिग्बन्धः ।

गरुड उवाच

अथ ध्यानं प्रवक्ष्यामि श्रृणु सर्वाङ्गसुन्दरम् ।
यत्कृतं देवदेवेन ध्यानं हनुमतः प्रियम् ॥ १ ॥
पञ्चवक्त्रं महाभीमं त्रिपञ्चनयनैर्युतम् ।
बाहुभिर्दशभिर्युक्तं सर्वकामार्थसिद्धिदम् ॥ २ ॥
पूर्वं तु वानरं वक्त्रं कोटिसूर्यसमप्रभम् ।
दंष्ट्राकरालवदनं भृकुटीकुटिलेक्षणम् ॥ ३ ॥

साधक को चाहिए कि सर्वप्रथम 'ॐ अस्य श्रीपञ्चमुख-हनुमन्मत्रस्य' से लेकर 'क्रैं अस्त्राय फट्' पर्यन्त मन्त्र पढ़ कर, दसों दिशाओं में चुटकी बजाता हुआ दिग्बन्धन करे।

गरुड जी ने कहा—हे सुन्दरी ! देवादिदेव भगवान् ने अपने प्रिय हनुमान् जी का जिस प्रकार ध्यान एवं पूजन आदि किया था उसका मैं निरूपण करता हूँ, उसे सावधान पूर्वक सुनो ॥ १ ॥ महा भयंकर पाँचमुख तथा पन्द्रह नेत्र एवं भक्तों के समस्त अभीष्ट कार्य को करने वाले, दस बाहुओं से युक्त पंचवक्त्र हनुमान् जी का स्वरूप है ॥ २ ॥ जिसमें पूर्व दिशा वाला मुख करोड़ों सूर्य के समान कान्ति, एवं भयंकर दाँतों से युक्त तथा क्रोध युक्त भृकुटी

अस्यैव दक्षिणं वक्त्रं नारसिंहं महाद्भुतम् ।
अत्युग्रतेजोवपुषं भीषणं भयनाशनम् ॥ ४ ॥
पश्चिमं गारुडं वक्त्रं वक्रतुण्डं महाबलम् ।
सर्वनागप्रशमनं विषभूतादिकृन्तनम् ॥ ५ ॥
उत्तरं सौकरं वक्त्रं कृष्णं दीप्तं नभोपमम् ।
पाताल- सिंह-वेताल- ज्वररोगादि - कृन्तनम् ॥ ६ ॥
ऊर्ध्वं हयाननं घोरं दानवान्तकरं परम् ।
येन वक्त्रेण विप्रेन्द्र ! तारकाख्यं महासुरम् ॥ ७ ॥
जघान शरणं तत् स्यात् सर्वशत्रुहरं परम् ।
ध्यात्वा पञ्चमुखं रुद्रं हनुमन्तं दयानिधिम् ॥ ८ ॥

चढ़ी हुई दृष्टि वाला वानर नाम का मुख है ॥ ३ ॥ उनके दक्षिण ओर के मुख का नाम नारसिंह है, जो कि भयविनाशक, अत्यन्त तेजस्वी शरीर वाला, भयंकर तथा महा अद्भुत है ॥ ४ ॥ उसी प्रकार महाबलवान्, समस्त नागों को शान्त करने वाला, तथा विष भूत आदि को नष्ट करने वाला, टेढ़े मुख वाले हनुमान् जी के पश्चिम मुख का नाम गारुडमुख है ॥ ५ ॥ उनके उत्तर दिशा की ओर के मुख का नाम सौकर है, जो कि आकाश के समान देदीप्यमान्, नील वर्ण वाला, तथा पाताल, सिंह, वेताल और ज्वरादि रोगों को नष्ट करने वाला है ॥ ६ ॥ उसी तरह भयंकर, दानवों को नष्ट करने वाला, तथा महाबलवान् तारकासुर को जिस मुख से वध किया था हे विप्रश्रेष्ठ ! ऐसे हनुमान् जी के ऊपर की ओर के मुख का नाम 'हयानन' है ॥ ७ ॥ जो साधक इन रुद्रस्वरूप, दयासागर, पंचमुख वाले हनुमान् का ध्यान करता है एवं उनके शरणागत होता है उसके समस्त शत्रुओं को हनुमान् जी नष्ट कर देते हैं ॥ ८ ॥

खड्गं त्रिशूलं खट्वाङ्गं पाशमङ्कुशपर्वतम् ।
मुष्टिं कौमोदकीं वृक्षं धारयन्तं कमण्डलुम् ॥ ९ ॥
भिन्दिपालं ज्ञानमुद्रां दशभिर्मुनिपुङ्गवम् ।
एतान्यायुधजालानि धारयन्तं भजाम्यहम् ॥ १० ॥
प्रेतासनोपविष्टं तं सर्वाभरणभूषितम् ।
दिव्यमाल्याम्बरधरं दिव्यगन्धानुलेपनम् ॥ ११ ॥
सर्वाश्चर्यमयं देवं हनुमद्विश्वतोमुखम् ।
पञ्चास्यमच्युतमनेकविचित्रवर्णं
वक्त्रं शशाङ्क-शिखरं कपिराजवर्यम् ।
पीताम्बरादि-मुकुटैरुपशोभिताङ्गं
पिङ्गाक्षमाद्यमनिशं मनसा स्मरामि ॥ १२ ॥
मर्कटेशं महोत्साहं सर्वशत्रुहरं परम् ।

खड्ग, त्रिशूल, खट्वांग, पाश, अंकुश, पर्वत, मुष्टि, कौमोदकी गदा, वृक्ष तथा कमण्डलु, भिन्दिपाल अस्त्र धारण किये हुए, एवं दशों ज्ञानमुद्रा ऋषियों को प्रदर्शित करते हुए, समस्त आभरणों से सुशोभित, प्रेतासन (मुरदे) पर बैठे हुए, दिव्य माला एवं गन्ध लगाये हुए, चारों ओर मुख वाले, आश्चर्यकारी ऐसे हनुमान् जी का मैं ध्यान करता हूँ ॥ ९-११ ॥ स्थिर, अनेक विचित्र वर्णों वाले, चन्द्रमा से सुशोभित मस्तक वाले, कवियों में श्रेष्ठ, पीताम्बर एवं मुकुट से सुशोभित अँग वाले, तथा पीले नेत्र वाले, आदिभूत, पंचमुख वाले हनुमान् जी का मैं मन से निरन्तर स्मरण करता हूँ ॥ १२ ॥ हे हनुमन् ! आप वानराधिपति, महान् उत्साही तथा समस्त शत्रुओं को नष्ट करने वाले हैं। अतः आप मेरी रक्षा करें,

शत्रु संहर मां रक्ष श्रीमन्नापदमुद्धर ॥ १३ ॥
ॐ हरिमर्कट मर्कट मन्त्रमिदं
परिलिख्यति लिख्यति वामतले ।
यदि नश्यति नश्यति शत्रुकुलं
यदि मुञ्चति मुञ्चति वामलता ॥ १४ ॥

ॐ हरिमर्कटाय स्वाहा । ॐ नमो भगवते पञ्चवदनाय पूर्वकपिमुखाय सकलशत्रुसंहारणाय स्वाहा । ॐ नमो भगवते पञ्चवदनाय दक्षिणमुखाय करालवदनाय नरसिंहाय सकलभूत-प्रमथनाय स्वाहा । ॐ नमो भगवते पञ्चवदनाय पश्चिममुखाय गरुडाननाय सकलविषहराय स्वाहा । ॐ नमो भगवते पञ्चवद-नायोत्तरमुखायादिवराहाय सकलसम्पत्कराय स्वाहा, ॐ नमो भगवते पञ्चवदनायोद्ध्र्वमुखाय हयग्रीवाय सकलजन-वशंकराय स्वाहा ।

विनियोगः—ॐ अस्य श्रीपञ्चमुखहनुमन्मन्त्रस्य श्रीराम-चन्द्रऋषिः, अनुष्टुप्छन्दः, पञ्चमुखवीरहनुमान् देवता,

---

शत्रुओं का संहार करें और भयंकर आपत्तियों से भी मेरा उद्धार करें ॥ १३ ॥ यदि साधक 'ॐ हरिमर्कटाय स्वाहा' इस मन्त्र को लिखकर अपनी बाँयीं भुजा में बाँधता है, तो उसके समस्त शत्रुकुल निश्चय ही नष्ट होते हैं। तथा अशुभ भी अपनी अशुभता का परित्याग कर शुभ फल प्रदान करता है ॥ १४ ॥

तत्पश्चात् 'ॐ हरिमर्कटाय स्वाहा' यहाँ से आरम्भ कर 'सकल-जनवशंकराय स्वाहा' पर्यन्त का पाठ करे।

विनियोग—दाहिने हाथ में जल लेकर 'ॐ अस्य श्रीपञ्चमुख-

हनुमानिति बीजम्, वायुपुत्र इति शक्तिः, अञ्जनीसुत इति कीलकम्, श्रीरामदूतहनुमत्प्रसादसिद्ध्यर्थे जपे विनियोगः। इति ऋष्यादिकं विन्यस्य।

करन्यासः—ॐ अञ्जनीसुताय अङ्गुष्ठाभ्यां नमः। ॐ रुद्रमूर्तये तर्जनीभ्यां नमः। ॐ वायुपुत्राय मध्यमाभ्यां नमः। ॐ अग्निगर्भाय अनामिकाभ्यां नमः। ॐ रामदूताय कनिष्ठिकाभ्यां नमः। ॐ पञ्चमुखहनुमते करतलकरपृष्ठाभ्यां नमः। इति करन्यासः।

हृदयादिन्यासः—ॐ अञ्जनीसुताय हृदयाय नमः। ॐ रुद्रमूर्तये शिरसे स्वाहा। ॐ वायुपुत्राय शिखायै वषट्। ॐ अग्निगर्भाय कवचाय हुम्। ॐ रामदूताय नेत्रत्रयाय वौषट्। ॐ पञ्चमुखहनुमते अस्त्राय फट्। इति हृदयादिन्यासः।

दिग्बन्धः—पञ्चमुखहनुमते स्वाहा। इति दिग्बन्धः।

ध्यानम्

[1]वन्दे वानर-नारसिंह-खगराट्-क्रोडाश्व-वक्त्रान्वितं

हनुमन्मन्त्रस्य' से लेकर 'जपे विनियोगः' तक पढ़कर जल छोड़ दे।

करन्यास—'ॐ अञ्जनीसुताय अङ्गुष्ठाभ्यां नमः' से लेकर 'ॐ पञ्चमुखहनुमते अस्त्राय फट्' पढ़ता हुआ करादि एवं हृदयादि न्यास करे। तत्पश्चात् 'पचमुखहनुमते स्वाहा' यह पढ़कर अपने मस्तक के चारों ओर चुटकी बजाता हुआ दिग्बन्ध करे।

---

१. पञ्चमुखीहनुमद्-ध्यानं ग्रन्थान्तरे—

ध्यायेद् वानर-नारसिंह-खगराट् क्रोडाश्ववक्त्रं स्फुटं
पद्माक्षीस्फुटपञ्चवक्त्ररुचिरं बालार्ककोटिद्युतिम्।
हस्ते शूल-कपाल-मुद्गरवरं कौमोदकीभूरुहं
खट्वाङ्गा-ऽङ्कुश-पाश-पर्वतधरं पीताम्बरं वानरम्॥

दिव्यालङ्करणं त्रिपञ्चनयनं देदीप्यमानं रुचा।
हस्ता-ऽब्जैरसिखेट-पुस्तक-सुधा-कुम्भा-ऽङ्कुशाद्रि हलं
खट्वाङ्गं फणिभूरुहं दशभुजं सर्वारिवीरापहम् ॥ १ ॥

विनियोगः—श्रीरामदूतायाऽऽञ्जनेयाय वायुपुत्राय महाबलपराक्रमाय सीतादुःखनिवारणाय लङ्कादहनकारणाय महाबलप्रचण्डाय फाल्गुनसखाय कोलाहल-सकलब्रह्माण्ड-विश्वरूपाय सप्तसमुद्रनिर्लङ्घनाय पिङ्गलनयनाया-ऽमितविक्रमाय सूर्यबिम्बफलसेवनाय दुष्टनिवारणाय दृष्टिनिरालङ्कृताय सञ्जीविनी-सञ्जीविताङ्गद-लक्ष्मण-महाकपिसैन्यप्राणदाय दशकण्ठविध्वंसनाय रामेष्टाय महाफाल्गुनसखाय सीतासहित-समवरप्रदाय षट्-प्रयोगागम-पञ्चमुखवीरहनुमन्मन्त्रजपे विनियोगः।

दिग्बन्धः—ॐ हरिमर्कट-मर्कटाय बं बं बं बं बं वौषट् स्वाहा। ॐ हरिमर्कट-मर्कटाय फं फं फं फं फं फट् स्वाहा। ॐ हरिमर्कट-मर्कटाय खें खें खें खें खें मारणाय स्वाहा। ॐ हरिमर्कट-

---

ध्यान—दिव्य अलंकारों से सुशोभित, पन्द्रह नेत्र वाले, अपनी कान्ति से ही देदीप्यमान्, तलवार, खेट, पुस्तक, अमृतकलश, अंकुश, पर्वत, हल, खट्वांग, सर्प और वृक्ष आदि आयुध (शस्त्र) अपने दसों करकमलों में धारण किये हुए, तथा समस्त वीर शत्रुओं को नष्ट करने वाले, वानर, नृसिंह, गरुड़, वाराह एवं अश्व, इन पाँच मुख वाले हनुमान् जी को मैं नमस्कार करता हूँ ॥ १ ॥

विनियोग—हाथ में जल लेकर, 'श्रीरामदूताया-ऽऽञ्जनेयाय' से प्रारम्भ कर 'हनुमन्मन्त्रजपे विनियोगः' तक पढ़कर जल छोड़े।

तत्पश्चात् 'ॐ हरिमर्कट-मर्कटाय' से लेकर 'षं सं हं लं क्षं

मर्कटाय लुं लुं लुं लुं लुं आकर्षित-सकलसम्पत्कराय स्वाहा। ॐ हरिमर्कट-मर्कटाय धं धं धं धं धं शत्रुस्तम्भनाय स्वाहा। ॐ टं टं टं टं टं कूर्ममूर्तये पञ्चमुखवीरहनुमते परयन्त्र-परतन्त्रोच्चाटनाय स्वाहा। ॐ कं खं गं घं ङं चं छं जं झं ञं टं ठं डं ढं णं तं थं दं धं नं पं फं बं भं मं यं रं लं वं शं षं सं हं लं क्षं स्वाहा। इति दिग्बन्धः।

ॐ पूर्वकपिमुखाय पञ्चमुखहनुते टं टं टं टं टं सकलशत्रु-संहारणाय स्वाहा। ॐ दक्षिणमुखाय पञ्चमुखहनुमते कराल-वदनाय नरसिंहाय ॐ ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः सकल-भूत-प्रेत-दमनाय स्वाहा। ॐ पश्चिममुखाय गरुडाननाय पञ्चमुखहनु-मते मं मं मं मं मं सकलविषहराय स्वाहा। ॐ उत्तरमुखाया-ऽऽदिवराहाय लं लं लं लं लं नृसिंहाय नीलकण्ठमूर्तये पञ्चमुखहनु-मते स्वाहा। ॐ ऊर्ध्वमुखाय हयग्रीवाय रुं रुं रुं रुं रुं रुद्रमूर्तये सकलप्रयोजन-निर्वाहकाय स्वाहा। ॐ अञ्जनीसुताय वायु-पुत्राय महाबलाय सीताशोकनिवारणाय श्रीरामचन्द्रकृपापादु-काय महीवीर्यप्रमथनाय ब्रह्माण्डनाथाय कामदाय पञ्चमुखवीर-हनुमते स्वाहा। भूत-प्रेतपिशाच-ब्रह्मराक्षस-शाकिनी-डाकिन्यन्त-रिक्षग्रह-परयन्त्र-परतन्त्रोच्चाटनाय स्वाहा। सकलप्रयोजननिर्वा-हकाय पञ्चमुखवीरहनुमते श्रीरामचन्द्रवरप्रसादाय जं जं जं जं जं स्वाहा।

स्वाहा' तक पढ़कर अपने मस्तक के चारों ओर चुटकी बजा कर दिग्बन्ध करे।

इसके बाद 'ॐ पूर्वकपिमुखाय' से आरम्भ कर 'जं जं जं जं जं

इदं कवचं पठित्वा तु महाकवचं पठेन्नरः ।
एकवारं जपेत् स्तोत्रं सर्वशत्रुनिवारणम् ।। १५ ।।
द्विवारं तु पठेन्नित्यं पुत्र-पौत्र-प्रवर्धनम् ।
त्रिवारं च पठेन्नित्यं सर्वसम्पत्करं शुभम् ।। १६ ।।
चतुर्वारं पठेन्नित्यं सर्वरोगनिवारणम् ।
पञ्चवारं पठेन्नित्यं सर्वलोकवशङ्करम् ।। १७ ।।
षट्वारं च पठेन्नित्यं सर्वदेववशङ्करम् ।
सप्तवारं पठेन्नित्यं सर्वसौभाग्यदायकम् ।। १८ ।।
अष्टवारं पठेन्नित्यमिष्टकामार्थ-सिद्धिदम् ।
नववारं पठेन्नित्यं राजभोगमवाप्नुयात् ।। १९ ।।
दशवारं पठेन्नित्यं त्रैलोक्यज्ञानदर्शनम् ।
रुद्रावृत्ति पठेन्नित्यं सर्वसिद्धिर्भवेद् ध्रुवम् ।। २० ।।

स्वाहा' तक इस कवच का पाठकर, तदनन्तर महाकवच का पाठ करे ।

इस कवच का एक बार पाठ करने से समस्त शत्रुनाश, दो बार करने से पुत्र-पौत्रादि की वृद्धि, तीन बार पाठ करने से समस्त सम्पत्ति प्राप्ति तथा चार बार पाठ करने से सभी रोगों का नाश, पाँच बार पाठ करने से समस्त प्राणिमात्रवशकारी एवं छह बार पाठ करने से समस्त देवगण वशीभूत, और सात बार पाठ करने से समस्त सौभाग्य प्राप्ति, आठ बार पाठ करने से इष्ट कार्य की सिद्धि, नव बार पाठ करने से राज्यसुखोपभोग प्राप्ति, दस बार पाठ करने से त्रिलोक ज्ञान की दृष्टि एवं ग्यारह बार पाठ करने से

कवचस्मरणेनैव　　　　महाबलमवाप्नुयात् ॥ २१ ॥

इति पण्डितश्रीशिवदत्तमिश्रशास्त्रिरचिते हनुमद्-रहस्ये
सुदर्शनसंहितायां　श्रीरामचन्द्रसीताप्रोक्तं
पञ्चमुख-हनुमत्कवचं सम्पूर्णम्।

※

सप्तमुखहनुमत्कवचम् ३.

विनियोग:—ॐ अस्य श्रीसप्तमुखीवीरहनुमत्कवचस्तोत्र-मन्त्रस्य नारदऋषिः, अनुष्टुप्छन्दः, श्रीसप्तमुखीकपिः, परमात्मा देवता, ह्रां बीजम्, ह्रीं शक्तिः, ह्रूं कीलकम्, मम सर्वाभीष्ट-सिद्धयर्थे जपे विनियोगः।

विनियोग—साधक को चाहिए कि सर्वप्रथम दाहिने हाथ में जल लेकर 'ॐ अस्य श्रीसप्तमुखीवीरहनुमत्कवचस्तोत्रमन्त्रस्य' से लेकर 'जपे विनियोगः' तक पढ़कर भूमि पर जल छोड़े। निश्चित ही समस्त कार्य सिद्ध होते हैं। और इस कवच के स्मरण मात्र से ही मनुष्य महाबलवान् होता है ॥ १५-२१ ॥

इस प्रकार हनुमद्-रहस्य में सुदर्शनसंहितान्तर्गत श्रीरामचन्द्र-सीताप्रोक्त हिन्दीव्याख्यासहित पञ्चमुखहनुमत्कवच समाप्त।

करन्यासः—ॐ ह्रां अङ्गुष्ठाभ्यां नमः, ॐ ह्रीं तर्जनीभ्यां नमः, ॐ ह्रूं मध्यमाभ्यां नमः, ॐ ह्रैं अनामिकाभ्यां नमः, ॐ ह्रौं कनिष्ठिकाभ्यां नमः, ॐ ह्रः करतलकरपृष्ठाभ्यां नमः। इति करन्यासः। एवं हृदयादिन्यासः।

ध्यानम्—

वन्दे वानर-सिंह-सर्प-रिपु-वाराहा-ऽश्व-गो-मानुषै-
युंक्तं सप्तमुखैः करैर्द्रुमगिरिं चक्रं गदां खेटकम्।
खट्वाङ्गं हलमङ्कुशं फणिसुधा-कुम्भौ शराब्जाभयान्
शूलं सप्तशिखं दधानममरैः सेव्यं कपिं कामदम्॥

ब्रह्मोवाच

सप्तशीर्ष्णः प्रवक्ष्यामि कवचं सर्वसिद्धिदम्।
जप्त्वा हनुमतो नित्यं सर्वपापैः प्रमुच्यते॥ १॥

करन्यास—'ॐ ह्रां अंगुष्ठाभ्यां नमः' से आरम्भ कर 'ॐ ह्रः करतलकरपृष्ठाभ्यां नमः' तक वाक्य पढ़कर करन्यास एवं हृदयादि-षडंगन्यास करे।

ध्यान—अपने करकमलों में वृक्ष, पर्वत, चक्र, गदा, खेटक, खट्वांग, हल, अंकुश, सर्प, अमृतकलश, बाण, कमल, अभय, शूल और अग्नि को धारण किये हुए, सर्वाभीष्टप्रदायक, देवताओं से भी सेवित, वानर, सिंह, गरुड, वाराह, अश्व तथा मनुष्य इन सप्तमुख वाले हनुमान् जी को मैं नमस्कार करता हूँ।

कवच—ब्रह्मा ने कहा—हे देवगण! सातमुख वाले हनुमान् जी के सर्वसिद्धिप्रदायक कवच का मैं वर्णन करता हूँ, जिसका नित्य पाठ करने से मनुष्य त्रिविध ताप-पाप से मुक्त हो जाता है॥ १॥

सप्तस्वर्गपतिः पायाच्छिखां मे मारुतात्मजः ।
सप्तमूर्धा शिरोऽव्यान्मे सप्तार्चिर्भालदेशकम् ॥ २ ॥
त्रिःसप्तनेत्रो नेत्रेऽव्यात् सप्तस्वरगतिः श्रुती ।
नासां सप्तपदार्थोऽव्यान्मुखं सप्तमुखोऽवतु ॥ ३ ॥
सप्तजिह्वस्तु रसनां रदान् सप्तहयोऽवतु ।
सप्तच्छन्दो हरिः पातु कण्ठं बाहू गिरिस्थितः ॥ ४ ॥
करौ चतुर्दशकरो भूधरोऽव्यान्ममाङ्गुलीः ।
सप्तर्षिध्यातो हृदयमुदरं कुक्षिसागरः ॥ ५ ॥
सप्तद्वीपपतिश्चित्तं सप्तव्याहृतिरूपवान् ।
कटिं मे सप्तसंस्थार्थदायकः सक्थिनी मम ॥ ६ ॥
सप्तग्रहस्वरूपी मे जानुनी जङ्घयोस्तथा ।
सप्तधान्यप्रियः पादौ सप्तपातालधारकः ॥ ७ ॥
पशून् धनं च धान्यं च लक्ष्मीं लक्ष्मीप्रदोऽवतु ।
दारान् पुत्रांश्च कन्याश्च कुटुम्बं विश्वपालकः ॥ ८ ॥

सप्तस्वर्गपति वायुनन्दन मेरे शिखा की, सप्तमूर्धा मस्तक की, सप्तार्चि कपाल की, त्रिसप्तनेत्र नेत्र की, सप्तस्वरगति दोनों कान की, सप्तपदार्थ नासिका की, सप्तमुख मुख की रक्षा करें ॥ २-३ ॥ इसी प्रकार सप्तजिह्व जीभ की, सप्तहय दाँत की, सप्तच्छन्दकपि कण्ठ की तथा गिरिस्थित दोनों बाहुओं की, चतुर्दशकर दोनों हाथों की, भूधर अँगुलियों की, सप्तर्षिध्यात हृदय की, कुक्षिसागर पेट की, सप्तद्वीपपति चित्त की, सप्तव्याहृति कटिप्रदेश की, सप्तसंस्थार्थदायक मेरे सक्थियों की रक्षा करें ॥ ४-६ ॥ तथा सप्तग्रहस्वरूपी मेरे घुटनों की, सप्तधान्यप्रिय जँघाओं की, सप्तपातालधारक मेरे पैरों की, लक्ष्मीप्रद पशु, धन, धान्य, लक्ष्मी की, विश्वपालक पत्नी, पुत्र,

अनुक्तस्थानमपि मे पायाद् वायुसुतः सदा ।
चौरेभ्यो व्यालदंष्ट्रिभ्यः श्रृङ्गिभ्यो भूत-राक्षसात् ॥ ९ ॥
दैत्येभ्योऽप्यथ यक्षेभ्यो ब्रह्मराक्षसजाद् भयात् ।
दंष्ट्राकरालवदनो हनुमान् मां सदाऽवतु ॥१०॥
परशस्त्र-मन्त्र-तन्त्र-यन्त्रा-ऽग्नि-जल-विद्युतः ।
रुद्रांशः शत्रुसंग्रामात् सर्वावस्थासु सर्वभृत् ॥११॥

ॐ नमो भगवते सप्तवदनाय आद्यकपिमुखाय वीरहनुमते सर्वशत्रुसंहारणाय ठं ठं ठं ठं ठं ठं ठं ॐ नमः स्वाहा ॥ १२ ॥

ॐ नमो भगवते सप्तवदनाय द्वितीयनारसिंहास्याय अत्युग्रतेजोवपुषे भीषणाय भयनाशनाय हं हं हं हं हं हं हं ॐ नमः स्वाहा ॥ १३ ॥

ॐ नमो भगवते सप्तवदनाय तृतीयगरुडवक्त्राय वज्रदंष्ट्राय महाबलाय सर्वरोगविनाशनाय मं मं मं मं मं मं मं ॐ नमः स्वाहा ॥ १४ ॥

ॐ नमो भगवते सप्तवदनाय चतुर्थक्रोडतुण्डाय सौमित्रि-रक्षकाय पुत्राद्यभिवृद्धिकराय लं लं लं लं लं लं लं ॐ नमः स्वाहा ॥ १५ ॥

कन्या एवं कुटुम्ब की रक्षा करें ॥ ७-८ ॥ मेरे अनुक्त (अकथित) अंगों की वायुसुत निरन्तर रक्षा करें। उसी प्रकार चोर, सर्प, भयंकर दाँत एवं सींग वाले पशु, भूत, राक्षसादिगण, दैत्य, यक्ष तथा ब्रह्मराक्षस द्वारा उत्पन्न भय से दंष्ट्राकरालवदन हनुमान् हमारी रक्षा करें ॥ ९-१० ॥ शत्रुद्वारा चलाये गये शस्त्र, मन्त्र, तन्त्र, यन्त्र आदि तथा अग्नि, जल, बिजली और शत्रु-संग्राम से रुद्रांश और सभी अवस्थाओं में सर्वभृत् कपि मेरी रक्षा करें ॥ ११ ॥

ॐ नमो भगवते सप्तवदनाय पञ्चमाश्ववदनाय रुद्रमूर्त्तये सर्ववशीकरणाय सर्वागमस्वरूपाय रुं रुं रुं रुं रुं रुं रुं ॐ नमः स्वाहा ॥ १६ ॥

ॐ नमो भगवते सप्तवदनाय षष्ठगोमुखाय सूर्यरूपाय सर्व-रोगहराय मुक्तिदात्रे ॐ ॐ ॐ ॐ ॐ ॐ ॐ ॐ नमः स्वाहा ॥ १७ ॥

ॐ नमो भगवते सप्तवदनाय सप्तमानुषमुखाय रुद्रा-वताराय अञ्जनीसुताय सकलदिग्यशोविस्तारकाय वज्रदेहाय सुग्रीवसाह्यकराय उदधिलङ्घनाय सीताशुद्धिकराय लङ्कादहनाय अनेकराक्षसान्तकाय रामानन्ददायकाय अनेकपर्वतोत्पाटकाय सेतुबन्धकाय कपिसैन्यनायकाय रावणान्तकाय ब्रह्मचर्याश्रमिणे कौपीनब्रह्मसूत्रधारकाय रामहृदयाय सर्वदुष्टग्रहनिवारणाय शाकिनी-डाकिनी-वेताल-ब्रह्मराक्षस-भैरवग्रह-यक्षग्रह-पिशाचग्रह ब्रह्मग्रह-क्षत्रियग्रह-वैश्यग्रह-शूद्रग्रहान्त्यजग्रह-म्लेच्छग्रह-सर्पग्रहो-च्चाटकाय मम सर्वकार्यसाधकाय सर्वशत्रुसंहारकाय सिंह-व्या-घ्रादि-दुष्ट-सत्त्वाकर्षकायैकाहिकादि-विविधज्वरच्छेदकाय पर-यन्त्र-मन्त्र-तन्त्र-नाशकाय सर्वव्याधि-निकृन्तकाय सर्पादि-सर्वस्था वर-जङ्गमविषस्तम्भनकराय सर्वराजभय-चोरभयाऽग्निभय-प्रश-मनाया-ऽऽध्यात्मिका-ऽऽधिदैविकाधि-भौतिक-तापत्रयनिवारणाय सर्वविद्या-सर्वसम्पत्-सर्वपुरुषार्थदायकाया-ऽसाध्यकार्यसाधकाय सर्ववरप्रदाय सर्वाऽभीष्टकरायॐ ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः ॐ नमः स्वाहा ॥ १८ ॥

तत्पश्चात् 'ॐ नमो भगवते सप्तवदनाय' से लेकर 'ॐ ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः ॐ नमः स्वाहा' तक इस कवच का पाठ करे ॥ १२-१८ ॥

फलश्रुतिः—य इदं कवचं नित्यं सप्तास्यस्य हनूमतः ।
त्रिसन्ध्यं जपते नित्यं सर्वशत्रुविनाशनम् ।। १९ ।।
पुत्र-पौत्रप्रदं सर्वं सम्पद्-राज्यप्रदं परम् ।
सर्वरोगहरं चाऽऽयुः-कीर्तिदं पुण्यवर्धनम् ।। २० ।।
राजानं स वशं नीत्वा त्रैलोक्यविजयी भवेत् ।
इदं हि परमं गोप्यं देयं भक्तियुताय च ।। २१ ।।
न देयं भक्तिहीनाय दत्त्वा स निरयं व्रजेत् ।। २२ ।।
नामानि सर्वाण्यपवर्गदानि रूपाणि विश्वानि च यस्य सन्ति ।
कर्माणि देवैरपि दुर्घटानि तं मारुतिं सप्तमुखं प्रपद्ये ।।२३।।

इति पण्डितश्रीशिवदत्तमिश्रशास्त्रिविनिर्मिते हनुमद्-रहस्ये-ऽथर्वणरहस्योक्त-सप्तमुखहनुमत्कवचं समाप्तम् ।

फलश्रुति—जो इस सप्तमुख हनुमत्कवच का त्रिकाल पाठ करता है उसके समस्त शत्रु नष्ट हो जाते हैं, तथा उसे पुत्र, पौत्र आदि की प्राप्ति होती है । एव उसके समस्त असाध्य रोग नष्ट हो जाते हैं । तथा समस्त सम्पत्ति एवं, राज्यसुख का वह उपभोग करता है । और उसकी आयु, कीर्त्ति एवं पुण्य की निरन्तर वृद्धि होती है ।। १९-२० ।। और वह प्राणी राजाओं को अपने वश कर त्रैलोक्य में विजय प्राप्त करता है । अत्यन्त गुप्त यह कवच श्रद्धा-भक्ति वाले आस्तिक पुरुष को ही प्रदान करना चाहिए । एवं श्रद्धा-भक्ति-हीन नास्तिक को यह कवच कदापि प्रदान न करे । यदि अज्ञान वश वह नास्तिक को उपदेश देता है, तो निश्चय ही वह नरकगामी होता है ।। २१-२२ ।। जिनके स्वरूप एवं नाम इस लोक में मोक्ष देने वाले हैं तथा जिनके कार्य अति भयंकर हैं, जिसे कि समस्त देवगण भी करने में असमर्थ हैं ऐसे सप्तमुख हनुमान् की मैं शरण में हूँ ।। २३ ।।

इस प्रकार पण्डितशिवदत्तमिश्रशास्त्रिकृत हनुमद्-रहस्य में अथर्वणरहस्योक्त हिन्दीव्याख्यासहित सप्तमुख हनुमत्कवच समाप्त ।

एकादशमुखहनुमत्कवचम् ४.

लोपामुद्रोवाच

कुम्भोद्भव ! दयासिन्धो ! श्रुतं हनुमतः प्रभोः ।
यन्त्र-मन्त्रादिकं सर्वं त्वन्मुखोदोरितं मया ॥ १ ॥
दयां कुरु मयि प्राणनाथ ! वेदितुमुत्सहे ।
कवचं वायुपुत्रस्य एकादशमुखात्मनः ॥ २ ॥
इत्येवं वचनं श्रुत्वा प्रियायाः प्रश्रयान्वितम् ।
वक्तुं प्रचक्रमे तत्र लोपामुद्रां प्रति प्रभुः ॥ ३ ॥

अगस्त्य उवाच

नमस्कृत्वा रामदूतं हनुमन्तं महामतिम् ।
ब्रह्मप्रोक्तं तु कवचं शृणु सुन्दरि ! सादरात् ॥ ४ ॥

अगत्स्यपत्नी लोपामुद्रा ने महर्षि अगत्स्यजी से कहा—हे दयासागर ! कुम्भ से उत्पन्न प्राणनाथ ! आप ने तो मुझे अपने मुख से ही श्रीहनुमान् जी का यन्त्र, मन्त्र, तन्त्र आदि सभी कुछ बताया। इसके अनन्तर वायुपुत्र एकादशमुख वाले हनुमान् जी के कवच जानने की मेरी अपूर्व इच्छा है, जिसे दयापूर्वक आप बताने की कृपा करें। इस प्रकार अपनी प्रिय पत्नी के वचन सुनकर लोपामुद्रा से अगत्स्यजी ने इस प्रकार कहा ॥ १-३ ॥

हे सुन्दरि ! सृष्टिविधायक ब्रह्मा-द्वारा कथित एकादशमुख वाले हनुमान् जी के कवच का वर्णन मैं करता हूँ, जिसे तुम श्रद्धा-भक्ति से सावधान-पूर्वक सुनो। इस प्रकार कहकर अतुलित बुद्धि वाले रामदूत हनुमान् जी को प्रणाम कर, महर्षि अगत्स्यजी ने इस प्रकार

सनन्दनाय च महच्चतुराननभाषितम् ।
कवचं कामदं दिव्यं रक्षःकुलनिबर्हणम् ॥ ५ ॥
सर्वसम्प्रत्प्रदं पुण्यं मर्त्यानां मधुरस्वरे ।
ॐ अस्य श्रीकवचस्यैकादशवक्त्रस्य धीमतः ॥ ६ ॥
हनुमत्कवचमन्त्रस्य सनन्दनऋषिः स्मृतः ।
प्रसन्नात्मा हनूमांश्च देवताऽत्र प्रकीर्तिता ॥ ७ ॥
छन्दोऽनुष्टुप्-समाख्यातं बीजं वायुसुतस्तथा ।
मुख्याऽत्र प्राणशक्तिच विनियोगः प्रकीर्तितः ।
सर्वकामार्थसिद्धयर्थे जप एवमुदीरयेत् ॥ ८ ॥
स्फें बीजशक्तिधृक् पातु शिरो मे पवनात्मजः ।
इति अङ्गुष्ठाभ्यां नमः ।

कहा ॥ ४ ॥ हे प्रिये ! चतुर्मुख ब्रह्मा ने समस्त अभीष्टप्रद एव सम्पूर्ण राक्षसों को नष्ट करने वाले, तथा अणिमादि आठ सिद्धियों को देने वाले, एकादशमुख वाले श्रीहनुमान् जी के पुण्यकारी कवच का वर्णन भगवद्-पार्षद सनन्दनादिकों से मधुर स्वर में इस प्रकार किया ॥ ५½ ॥

विनियोग—हे सनन्दनादि महर्षिगण ! इन एकादशमुख वाले हनुमत्कवच मन्त्र के सनन्दन ऋषि, प्रसन्न चित्त वाले हनुमान् देवता, अनुष्टुप् छन्द, वायुसुत बीज एवं मुख्य प्राण शक्ति रूप से हैं, इस प्रकार कहा। साधक को चाहिए कि वह दाहिने हाथ में जल लेकर 'ॐ अस्य श्री कवचस्य एकादशवक्त्रस्य' इत्यादि देश-काल का निरूपण करते हुए, सर्वकामार्थ-सिद्धयर्थे जपे विनियोगः' तक कहकर भूमि पर जल छोड़ दे ॥ ५½-८ ॥

न्यास—तत्पश्चात् 'स्फें बीजशक्तिधृक् पातु' से आरम्भ कर,

क्रौं बीजात्मा नयनयोः पातु मां वानरेश्वरः ।
इति तर्जनीभ्यां नमः ॥ ६ ॥

ॐ क्षं बीजरूपीकर्णौ मे सीताशोकविनाशनः ।
इति मध्यमाभ्यां नमः ।

ॐ ग्लौं बीजवाच्यो नासां मे लक्ष्मणप्राणदायकः ।
इति अनामिकाभ्यां नमः ॥ १० ॥

ॐ वं बीजार्थश्च कण्ठं मे अक्षयक्षयकारकः ।
इति कनिष्ठिकाभ्यां नमः ।
ॐ रां बीजवाच्यो हृदयं पातु मे कपिनायकः ।
इति करतलकरपृष्ठाभ्यां नमः ॥ ११ ॥

कवचम्

ॐ वं बीजकीर्तितः पातु बाहू मे चाऽञ्जनीसुतः ।
ॐ ह्रां बीजं राक्षसेन्द्रस्य दर्पहा पातु चोदरम् ॥ १२ ॥
सौं बीजमयो मध्यं मे पातु लङ्काविदाहकः ।
ह्रीं बीजधरो गुह्यं मे पातु देवेन्द्रवन्दितः ॥ १३ ॥
रं बीजात्मा सदा पातु चोरू मे वार्धिलङ्घनः ।

'इति करतलकरपृष्ठाभ्यां नमः' तक पढ़कर करादि तथा हृदयादि षडंगन्यास करे ॥ ९-११ ॥

कवच—'वं' बीजयुक्त अंजनीसुत मेरे दोनों भुजाओं की, 'ह्रां' बीज युक्त रावण के अभिमान को नष्ट करने वाले दर्पहा पेट की, 'सौं' बीज सहित लंकाविदाहक नाभि की, 'ह्रीं' बीज वाले देवेन्द्र-वन्दित गुप्तांग की, 'रं' बीजात्मक वार्धिलंघन दोनों घुटनों की, सुग्रीव

सुग्रीवसचिवः पातु जानुनी मे मनोजवः ॥ १४ ॥
आपादमस्तकं पातु रामदूतो महाबलः ।
पूर्वे वानरवक्त्रो मां चाऽग्नेय्यां क्षत्रियान्तकृत् ॥ १५ ॥
दक्षिणे नारसिंहस्तु नैऋत्यां गणनायकः ।
वारुण्यां दिशि मामव्यात् खगवक्त्रो हरीश्वरः ॥ १६ ॥
वायव्यां भैरवमुखः कौबेर्यां पातु मे सदा ।
क्रोडास्यः पातु मां नित्यमीशान्यां रुद्ररूपधृक् ॥ १७ ॥
रामस्तु पातु मां नित्यं सौम्यरूपी महाभुजः ।
एकादशमुखस्यैतद् दिव्यं वै कीर्तितं मया ॥ १८ ॥
रक्षोघ्नं कामदं सौम्यं सर्वसम्पद्-विधायकम् ।
पुत्रदं धनदं चोग्रं शत्रुसम्पत्तिमर्द्दनम् ॥ १९ ॥
स्वर्गा-ऽपवर्गदं दिव्यं चिन्तितार्थप्रदं शुभम् ।

मन्त्री मनोजव मेरे जानु की रक्षा करें ॥ १२-१४ ॥ इसी प्रकार महाबली रामदूत पैर से लेकर मस्तक पर्यन्त मेरे सभी अंगों की रक्षा करें। तथा वानरमुख वाले पूर्व दिशा में, परशुराम आकृति वाले आग्नेय में, नारसिंह वक्त्र वाले दक्षिण में, गणेश मुख वाले नैऋत्य में, एवं गरुडमुख वाले कपीश्वर पश्चिम में, भैरव मुखवाले वायव्य में, वाराह मुख वाले उत्तर में तथा रुद्रमुख वाले ईशान दिशा में मेरी निरन्तर रक्षा करें ॥ १५-१७ ॥ विशाल बाहु वाले शान्त-स्वरूप, मर्यादा-पुरुषोत्तम भगवान् राम मेरी निरन्तर रक्षा करें। इस प्रकार मैंने आप से राक्षसों को नष्ट करने वाले, सर्वाभीष्टप्रद, सौम्य, सर्व. सम्पत्ति-प्रदायक, पुत्र एवं धनप्रद तथा समस्त शत्रु और उनकी सम्पत्ति विनाशक, चिन्तित मनोरथ पूर्णकारक, स्वर्ग-मोक्षप्रद, एकादशमुख वाले हनुमान् जी के इस दिव्य कवच का वर्णन किया।

एतत् कवचमज्ञात्वा मन्त्रसिद्धिर्न जायते ॥ २० ॥

फलश्रुतिः

चत्वारिंशत्सहस्राणि पठेच्छुद्धात्मना नरः ।
एकवारं पठेन्नित्यं कवचं सिद्धिदं महत् ॥ २१॥
द्विवारं वा त्रिवारं वा पठेदायुष्यमाप्नुयात् ।
क्रमादेकादशादेवमावर्तनकृतात् सुधीः ॥ २२ ॥
वर्षान्ते दर्शनं साक्षाल्लभते नाऽत्र संशयः ।
यं यं चिन्तयते कामं तं तं प्राप्नोति पूरुषः ।
ब्रह्मोदीरितमेतद्धि तवाऽग्रे कथितं महत् ॥ २३॥

इत्येवमुक्त्वा कवचं महर्षिस्तूष्णीं बभूवेन्दुमुखीं निरीक्ष्य ।

इस कवच को बिना किये किसी भी अवस्था में मन्त्र सिद्धि नहीं होती ॥ १८-२० ॥

फलश्रुति—मनुष्य को चाहिए कि वह अत्यन्त श्रद्धा-भक्तिपूर्वक चालिस हजार इस कवच का पाठ करे। तथा सदैव एक बार पाठ करने से यह कवच सिद्ध होता है। उसी प्रकार दो या तीन बार नित्य पाठ करने से अपमृत्यु (अकाल मृत्यु) का नाश एवं आयुष्यं वृद्धि कारक होता है। जो साधक नित्य इस कवच का ग्यारह बारह पाठ करता है, उसे निश्चित ही वर्षभर के भीतर निःसन्देह हनुमान् जी का साक्षात्कार दर्शन प्राप्त होता है। और वह जिन-जिन कामनाओं की इच्छा करता है वे सभी अवश्य ही उसके पूर्ण होते हैं। हे प्रिये ! ब्रह्मा ने सनन्दनादि ऋषियों से जिस प्रकार इस कवच का निरूपण किया था उसे मैंने तुम्हारे समक्ष सम्पूर्ण रूप से कहा ॥२१-२३॥ इस प्रकार महर्षि अगस्त्य जी ने इस कवच का चन्द्रमुखी

संहृष्टचित्ताऽपि तदा तदीय-पादौ ननामाऽतिमुदा स्वभर्तुः ॥२४॥

इति पण्डितश्रीशिवदत्तमिश्रशास्त्रिरचिते हनुमद्-रहस्ये
ऽगस्तिसंहितोक्त-एकादशमुखहनुमत्कवचं सम्पूर्णम् ।

*

श्रीहनुमत्स्तोत्रम्

नमो हनुमते तुभ्यं नमो मारुतसूनवे ।
नमः श्रीरामभक्ताय श्यामलाङ्गाय ते नमः ॥ १ ॥
नमो वानरवीराय सुग्रीवसख्यकारिणे ।
सीता-शोक-विनाशाय राममुद्राधराय च ॥ २ ॥
रावणान्त-कुलच्छेदकारिणे ते नमो नमः ।
मेघनाद-मखध्वंस-कारिणे ते नमो नमः ॥ ३ ॥

लोपामुद्रा के समक्ष वर्णन कर मौन हो गये। तत्पश्चात् अत्यन्त प्रसन्न चित्तवाली उस लोपामुद्रा ने अपने परमाराध्य पति अगत्स्यजी के चरणों में अत्यन्त श्रद्धा-भक्ति युक्त हो प्रणाम किया ॥ २४ ॥

इस प्रकार पण्डितशिवदत्तमिश्रशास्त्रिकृत हनुमद्-रहस्य में
अगस्तिसंहितोक्त हिन्दीव्याख्यासहित एकादशमुख-
हनुमत्कवच सम्पूर्ण ।

*

मारुतसुत, श्रीरामभक्त, श्याममुख वाले हनुमान्जी को नमस्कार है ॥ १ ॥ वानरों में श्रेष्ठ, सुग्रीव से मित्रता करने वाले तथा सीता के शोक नष्ट करने वाले, श्रीराममुद्रा (अँगूठी) धारण करने वाले, रावण के कुल को समूल उच्छेदन करने वाले, मेघनाद के यज्ञ को नष्ट करने वाले आपको बारंबार नमस्कार है ॥ २-३ ॥

वायुपुत्राय वीराय आकाशोदरगामिने ।
वनपाल-शिरच्छेद-लङ्काप्रासादभञ्जिने ॥ ४ ॥
ज्वलत्कनकवर्णाय दीर्घलाङ्गूलधारिणे ।
सौमित्रिजयदात्रे च रामदूताय ते नमः ॥ ५ ॥
अक्षय्यवधकर्त्रे च ब्रह्मपाशनिवारिणे ।
लक्ष्मणांघ्रि-महाशक्ति-घातक्षत-विनाशिने ॥ ६ ॥
रक्षोघ्नाय रिपुघ्नाय भूतघ्नाय च ते नमः ।
ऋक्ष-वानर-वीरैकप्राणदाय नमो नमः ॥ ७ ॥
परसैन्यबलघ्नाय शस्त्राऽस्त्रघ्नायते नमः ।
विषघ्नाय द्विषघ्नाय ज्वरघ्नाय च ते नमः ॥ ८ ॥
महाभयरिपुघ्नाय भक्तत्राणैककारिणे ।

वायुपुत्र, वीर, उछलकर आकाश में जाने वाले, अशोक वन की रक्षा करने वाले, राक्षसों के सिर काटने वाले, लंका के महल को नष्ट करने वाले, तपे हुए सुवर्ण के समान स्वरूप वाले, लम्बी पूँछ वाले, संजीवनी बूटी द्वारा लक्ष्मण को जीवित करने वाले रामदूत को नमस्कार है ॥ ४-५ ॥

अक्षय कुमार को मारने वाले, ब्रह्मपाश को अपने हुंकार से लौटाने वाले, मेघनाद द्वारा प्रयुक्त लक्ष्मण के चरणों में महाशक्ति से उत्पन्न प्रहार को नष्ट करने वाले, राक्षस, शत्रु एवं भूत, प्रेतादिकों को नष्ट करने वाले, भालू, वानर आदिकों को प्राणदान करने वाले, शत्रु के सैन्य को नष्ट करने वाले तथा अस्त्र, शस्त्रों को विनष्ट करने वाले, विष, शत्रु तथा ज्वर को नाश करने वाले ऐसे आपको बारंबार नमस्कार है ॥ ६-८ ॥

महाभय एवं शत्रुनाशक, अपने भक्तों के एकमात्र रक्षक, शत्रुओं

परप्रेरित-मन्त्राणां यन्त्राणां स्तम्भकारिणे ॥ ९ ॥
पयःपाषाण-तरणकरणाय नमो नमः ।
बालार्क-मण्डलत्रास-कारिणे भवतारणे ॥ १० ॥
नखायुधाय भीमाय दन्तायुधधराय च ।
रिपुमायाविनाशाय रामाज्ञालोकरक्षिणे ॥ ११ ॥
प्रतिग्रामस्थितायाऽथ रक्षोभूतवधार्थिने ॥ १२ ॥
करान्त-शैलशस्त्राय द्रुमशस्त्राय ते नमः ।
बालैकब्रह्मचर्याय रुद्रमूर्तिधराय च ॥ १३ ॥
दक्षिणाशाभास्कराय शतचन्द्रोदयात्मने ।
कृत-क्षत-व्यथाघ्नाय सर्वक्लेशहराय च ॥ १४ ॥

के द्वारा प्रेरित मारण, मोहन, उच्चाटन और वशीकरण आदि मन्त्र-यन्त्रों को स्तम्भन करने वाले, सेतुबन्ध के समय समुद्र में पत्थर को तैराने वाले तथा उदित सूर्यमण्डल को त्रस्त करने वाले, अपने भक्तों को संसार रूपी भवसागर से पार करने वाले ऐसे श्रीहनुमान् जी को पुनः पुनः नमस्कार है ॥ ९-१० ॥

भयंकर रूप वाले, नख एवं दाँतरूप प्रधान शस्त्र धारण करने वाले तथा शत्रु की माया को समूल नष्ट करने वाले, राम की आज्ञा को पालन करने वाले, राक्षस एवं भूतगणों का निरन्तर वध करने वाले, ग्राम में स्थित रहने वाले ऐसे हनुमान् जी को नमस्कार है ॥ ११-१२ ॥ शैलखण्ड एवं वृक्षरूप शस्त्र को धारण करने वाले, बालब्रह्मचारी, दक्षिणायन सूर्यस्वरूपवाले, एक साथ सैकड़ों उदय चन्द्र के समान स्वरूपवाले, प्राणिमात्र के क्षत (घाव) व्यथा को नष्ट करने वाले एवं समस्त कष्ट को तत्क्षण दूर करने वाले ऐसे हनुमान् जी को नमष्कार है ॥ १३-१४ ॥

स्वाम्याज्ञा-प्रार्थ-संग्रामसंख्ये सञ्जयकारिणे ।
भक्तानां दिव्यवादेषु संग्रामे जयदायिने ।। १५ ।।
किं कृत्वा बुबुकोच्चार-घोरशब्दकराय च ।
रावोग्र-व्याधि-संस्तम्भ-कारिणे वनधारिणे ।। १६ ।।
सदा वनफलाहार-निरताय विशेषतः ।
महार्णव-शिलाबन्धे सेतुबन्धाय ते नमः ।। १७ ।।
वादे विवादे संग्रामे भये घोरे च संस्तवेत् ।
सिंह-तस्कर-व्याघ्रेषु पठंस्तत्र भयं न हि ।। १८ ।।
दिव्यभूतमये व्याघ्रे विषे स्थावर-जङ्गमे ।
राजशस्त्रभये चोग्रे तथा ग्रहभयेषु च ।। १९ ।।
जले सर्पे महावृष्टौ दुर्भिक्षे प्राणसम्प्लवे ।

स्वामी के आज्ञानुसार अनेक युद्ध में प्रवृत्त होने वाले, सत्यमार्ग में स्थित, सर्वदा विजय कराने वाले, अपने भक्तों के समस्त व्यवहार एवं वाद-विवाद तथा संग्राम में विजय प्राप्त कराने वाले, एकाएक भयंकर 'बुबुक' अर्थात् बन्दर घुड़की दिखाने वाले, प्रसन्नतारूपी सुन्दर किलकारी से भयंकर से भयंकर व्याधि को नष्ट करने वाले, सर्वदा वन में विचरण करने वाले श्रीहनुमान् जी को नमस्कार है ।।१५-१६।। निरन्तर जंगली फलों के आहार में रत रहने वाले, विशेषकर लंका में जाने के लिए समुद्र में पत्थर तैराकर पुल बनाने वाले श्रीहनुमान् जी को नमस्कार है ।। १७ ।।

वाद-विवाद, संग्राम, भयंकर भय, सिंह, चोर तथा व्याघ्र (बाघ) आदि द्वारा उत्पन्न भय इस हनुमत् स्तोत्र के पाठ करने से नष्ट होते हैं। उसी प्रकार भूत-प्रेतादि, व्याघ्र, विष तथा समस्त चराचर से उत्पन्न भय एवं भयंकर राज-शस्त्रभय, ग्रहभय, जल-सर्प,

पठन् स्तोत्रं प्रमुच्येत भयेभ्यः सर्वतो नरः ॥ २० ॥
तस्य क्वापि भयं नास्ति हनुमत्-स्तव-पाठनात् ।
सर्वदा वै त्रिकालं च पठनीयस्तवो ह्यसौ ॥ २१ ॥
सर्वान् कामानवाप्नोति नाऽत्र कार्या विचारणा ।
विभीषणकृतं स्तोत्रं ताक्ष्येंण समुदीरितम् ॥ २२ ॥
ये पठिष्यन्ति भक्त्या च सिद्धयस्तत्करे स्थिताः ॥ २३ ॥

इति पण्डितश्रीशिवदत्तमिश्रशास्त्रिरचिते हनुमद्-रहस्ये सुदर्शन-संहितोक्तं विभीषणप्रोक्तं हनुमत्स्तोत्रं सम्पूर्णम् ।

*

महावृष्टि, दुर्भिक्ष, प्राणसंकट आदि समस्त भयों से इस स्तोत्र का पाठ करने वाला मनुष्य छुटकारा पा जाता है ॥ १८-२० ॥ इस हनुमत्स्तोत्र के तीनों समय (प्रातः, मध्याह्न, सायं) निरन्तर पाठ करने वाले मनुष्य को भय कभी भी नही होता। अतः इसका पाठ अवश्य करना चाहिए। निःसन्देह इस स्तोत्र के पाठ करने वाले प्राणी अपने समस्त अभीष्ट कार्य-सिद्धि प्राप्त करते हैं। उक्त स्तोत्र गरुड़ जी ने प्राणिमात्र के कल्याण के लिए कहा। जिसे विभीषण ने छन्दोबद्ध किया। जो प्राणी परम भक्ति से इस स्तोत्र का पाठ करेंगे, उनकी समस्त सिद्धियाँ मानो उनके मुट्ठी में बन्द हैं, अर्थात् वे समस्त सिद्धियाँ निःसन्देह प्राप्त करते हैं ॥ २१-२३ ॥

इस प्रकार श्रीशिवदत्तमिश्रशास्त्रिकृत हिन्दी टीकासहित हनुमद्-रहस्य में श्रीसुदर्शनसंहितोक्त विभीषणरचित हनुमत्स्तोत्र समाप्त।

*

श्रीहनुमत्सहस्रनामस्तोत्रम्

ऋषय ऊचुः

ऋषे लोहगिरिं प्राप्तः सीता-विरह-कातरः ।
भगवन् ! किं विधाद्-रामस्तत्सर्वं ब्रूहि सत्त्वरम् ॥ १ ॥

वाल्मीकिरुवाच

मायामानुषदेहोऽयं ददर्शाऽग्रे कपीश्वरम् ।
हनुमन्तं जगत्स्वामी बालाऽर्कसमतेजसम् ॥ २ ॥
स सत्त्वरं समागम्य साष्टाङ्गं प्रणिपत्य च ।
कृताञ्जलिपुटो भूत्वा हनुमान् राममब्रवीत् ॥ ३ ॥

हनुमानुवाच

धन्योऽस्मि कृतकृत्योऽस्मि दृष्ट्वा तत्पादपङ्कजम् ।
योगिनामप्यगम्यं च संसारभयनाशनम् ॥ ४ ॥

ऋषियों ने वाल्मीकि से कहा—हे भगवन् ! सीता के विरह से दुःखी भगवान् राम किस प्रकार लोहगिरि (ऋष्यमूक पर्वत) पर पधारे। इस समस्त वृत्तान्त का वर्णन करने की कृपा करें ॥ १ ॥

वाल्मीकि ने कहा—उदय-कालीन सूर्य के समान तेजस्वी, त्रिलोकस्वामी, कपीश्वर हनुमान् के समक्ष परात्पर परब्रह्म परमेश्वर मर्यादा पुरुषोत्तम भगवान् राम ने अपनी मायारूप विग्रह (स्वरूप) का दर्शन कराया ॥ २ ॥ अपने इष्टदेव के इस स्वरूप का दर्शन करते ही तत्क्षण हूक मारकर उनके चरणों में साष्टांग प्रणाम करते हुए हाथ जोड़कर भगवान् राम से हनुमान् जी ने इस प्रकार कहा ॥ ३ ॥

श्री हनुमान् जी ने कहा—योगियों के लिए परम योगतत्त्व द्वारा भी अगम्य, संसाररूपी भय को नष्ट करने वाले स्वाभीष्ट इन चरण-कमल को देखकर आज मैं धन्य एवं कृतकृत्य हो गया ॥ ४ ॥

पुरुषोत्तम ! देवेश ! कर्तव्यं तन्निवेद्यताम् ।

श्रीराम उवाच

जनस्थानं कपिश्रेष्ठ ! कोऽप्यागत्य विदेहजाम् ॥ ५ ॥
हृतवान् विप्रसंवेशो मारीचानुगते मयि ।
गवेष्य साम्प्रतं वीर ! जानकीहरणेपर ॥ ६ ॥
त्वया गम्यो न को देशस्त्वं च ज्ञानवतां वरः ।
सप्तकोटि-महामन्त्र-मन्त्रितावयवः प्रभुः ॥ ७ ॥

ऋषय ऊचुः

को मन्त्रः किं च तद्ध्यानं तन्नो ब्रूहि यथार्थतः ।
कथासुधारसं पीत्वा न तृप्यामः परन्तप ! ॥ ८ ॥

हे देवादिदेव पुरुषोत्तम ! आप आज्ञा प्रदान कीजिए, कि मुझे अब क्या करना चाहिए ? ॥ ४३ ॥

राम ने कहा—हे कपिवर ! मेरी पर्णकुटी में जब कि हम सुवर्णमय मायामृग के वध के लिए उसके पीछे जाने पर ब्राह्मण-स्वरूप धारण कर, न जाने कोई व्यक्ति उस कुटी में आकर विदेह·राजपुत्री सीता का अपहरण कर लिया। अतः हे वीर ! जानकी के अपहरण करने वाले उस मनुष्य का अति शीघ्र (इसी समय) खोज करो। कारण कि आप ज्ञानियों में श्रेष्ठ एवं सप्तकोटि (सात करोड़) महामन्त्र से अभिमन्त्रित शरीर वाले समर्थ पुरुष हैं। इसलिए आपके लिए कोई भी देश अगम्य नहीं है ॥ ५-७ ॥

ऋषियों ने कहा कि हे परम तपस्वी ! वह मन्त्र तथा ध्यान कौन-सा है इसका वास्तविक रूप से निरूपण करने की आप कृपा करें। कारण कि इस कथारूपी अमृतरस का पान कर अभी तक हम लोग अतृप्त ही रहे ॥ ८ ॥

वाल्मीकिरुवाच

मन्त्रं हनुमतो विद्धि भुक्ति-मुक्ति-प्रदायकम् ।
महारिष्ट-महापाप-महादुःख-निवारणम् ॥ ९ ॥

मन्त्रः—ॐ ऐं ह्रीं [1]हनुमते रामदूताय लङ्काविध्वंसनायाऽञ्जनीगर्भसम्भूताय शाकिनी-डाकिनी-ध्वंसनाय किलि-किलि बुबुकारेण विभीषणाय हनुमद्देवाय। ॐ ह्रीं श्रीं ह्रौं ह्रां फट् स्वाहा।

अन्यं हनुमतो मन्त्रं सहस्रनामसंज्ञितम् ।
जानन्ति ऋषयः सर्वे महादुरितनाशनम् ॥ १० ॥
यस्य संस्मरणात् सीता लब्धा राज्यमकण्टकम् ।
विभीषणाय च ददावात्मानं लब्धवान् मया ॥ ११ ॥

ऋषय ऊचुः

सहस्रनाम-सन्मन्त्रं दुःखाद्यौघ-निवारणम् ।
वाल्मीके ! ब्रूहि नस्तूर्णं शुश्रूषामः कथां पराम् ॥ १२ ॥

वाल्मीकि ने कहा—भुक्ति-मुक्ति प्रदायक, एवं महारिष्ट, महापाप, महादुःखों को नष्ट करने वाला 'ॐ ऐं ह्रीं हनुमते रामदूताय' से लेकर 'फट् स्वाहा' तक यह हनुमन्मन्त्र है ॥ ९ ॥ इसी प्रकार अन्य सहस्र-नाम वाले समस्त पाप एवं आधि-व्याधि-विनाशक हनुमान्‌जी के मन्त्र को तो समस्त ऋषिगण जानते ही हैं ॥ १० ॥ जिस मन्त्र के स्मरण मात्र से ही मैंने अपहृत सीता प्राप्त की, और विभीषण को अकण्टक राज्य प्रदान किया ॥ ११ ॥

ऋषियों ने कहा—हे वाल्मीकि मुनि ! आधि-व्याधि एवं समस्त दुःखों को नष्ट करने वाले इस सहस्रनाम मन्त्र को बताने की कृपा प्रदान करें, क्योंकि इस परम उत्कृष्ट कथा श्रवण करने की आपके श्रीमुख द्वारा इच्छा करते हैं ॥ १२ ॥

---

१. अत्र 'श्रीं' इति क्वाचित्कोऽधिकः पाठः ।

वाल्मीकिरुवाच

श्रृण्वन्तु ऋषयः सर्वे सहस्रनामकं स्तवम् ।
स्तवानामुत्तमं दिव्यं सदर्थस्य प्रदायकम् ॥ १३ ॥

विनियोगः—ॐ अस्य श्रीहनुमत्सहस्रनामस्तोत्रमन्त्रस्य श्रीरामचन्द्रऋषिः, अनुष्टुप्छन्दः, श्रीहनुमान् महारुद्रो देवता, ह्लीं श्रीं ह्लौं ह्लां बीजम्, श्रीं इति शक्तिः, किलि-किलि बुबुकारेणेति कीलकम्, लङ्काविध्वंसनेति कवचम्, मम सर्वोपद्रवशान्त्यर्थे सर्वकामसिद्ध्यर्थे च जपे विनियोगः ।

न्यासः—ऋष्यादिकं विन्यस्य । ॐ ऐं हनुमते रामदूताय अङ्गुष्ठाभ्यां नमः । ॐ लङ्काविध्वंसनाय तर्जनीभ्यां स्वाहा । ॐ अञ्जनीगर्भसम्भूताय मध्यमाभ्यां वषट् । ॐ शाकिनी-डाकिनी-विध्वंसनाय अनामिकाभ्यां हुम् । ॐ किलि-किलि बुबुकारेण विभीषणाय हनुमद्देवाय कनिष्ठिकाभ्यां वौषट् । ॐ ह्लीं श्रीं ह्लौं ह्लां फट् स्वाहा करतलकरपृष्ठाभ्यां फट् । एवं हृदयादि ।

वाल्मीकि ने कहा—हे ऋषिगण ! समस्त स्तोत्रों में उत्तम दिव्य स्तोत्र तथा अपने अभीष्ट मनोरथ को पूर्ण करने वाले इस सहस्रनाम-स्तोत्र का आप लोग श्रवण करें ॥ १३ ॥

विनियोग—दाहिने हाथ में जल लेकर 'ॐ अस्य श्रीहनुमत्सहस्र-नामस्तोत्रमन्त्रस्य' से आरम्भ कर 'जपे विनियोगः' तक वाक्य पढ़कर भूमि पर जल छोड़ दे ।

न्यास—तत्पश्चात् ऋष्यादि न्यास कर, 'ॐ ऐं हनुमते राम-दूताय' से लेकर फट् स्वाहा' तक पढ़कर करादि एवं हृदयादि षडंग-न्यास करे ।

ध्यानम्

प्रतप्तस्वर्ण-वर्णाभं संरक्तारुणलोचनम् ।
सुग्रीवादियुतं ध्यायेत् पीताम्बरसमावृतम् ॥
गोष्पदीकृतवारीशं पुच्छमस्तकमीश्वरम् ।
ज्ञानमुद्रां च बिभ्राणं सर्वालङ्कारभूषितम् ॥ १४ ॥
इति ध्यायेत् ।

श्रीरामचन्द्र उवाच

हनुमान् श्रीपदो वायुपुत्रो रुद्रोऽनघोऽजरः ।
अमृत्युर्वीरवीरश्च ग्रामवासो जनाश्रयः ॥ १५ ॥
धनदो निर्गुणः कायो वीरो निधिपतिर्मुनिः ।
पिङ्गाक्षो वरदो वाग्मी सीताशोकविनाशनः ॥ १६ ॥
शिवः सर्वः परोऽव्यक्तो व्यक्ताऽव्यक्तो रसाधरः ।
पिङ्गरोमः पिङ्गकेशः श्रुतिगम्यः सनातनः ॥ १७ ॥
अनादिर्भगवान् देवो विश्वहेतुर्निरामयः ।
आरोग्यकर्ता विश्वेशो विश्वनाथो हरीश्वरः ॥ १८ ॥

पश्चात् 'प्रतप्तस्वर्णवर्णाभं' से लेकर 'सर्वालङ्कारभूषितम्' पर्यन्त श्लोक पढ़कर श्रीहनुमान् जी का ध्यान करें। *श्लोकार्थ*—तपे हुए सुवर्ण के समान देदीप्यमान, रक्त नेत्र वाले, पीताम्बरधारी, समुद्र का उल्लंघन करने वाले, मस्तक पर पुच्छ (पोंछ) लपेटे हुए, ज्ञानमुद्रा से सुशोभित एवं समस्त अलंकारों से अलंकृत तथा सुग्रीवादि समस्त वानर गणों से घिरे हुए, सर्व-समर्थ श्रीहनुमान् जी का ध्यान करे ॥ १४ ॥

अब इसके बाद 'श्रीरामचन्द्र उवाच—हनुमान् श्रीपदः' श्लोक (१५)

भर्गो रामो रामभक्तः कल्याणप्रकृतिः स्थिरः ।
विश्वम्भरो विश्वमूर्तिर्विश्वाकारोऽथ विश्वदः ॥ १९ ॥
विश्वात्मा विश्वसेव्योऽथ विश्वो विश्वहरो रविः ।
विश्वचेष्टो विश्वगम्यो विश्वधेयः कलाधरः ॥ २० ॥
प्लवङ्गमः कपिश्रेष्ठो ज्येष्ठो विद्यावनेचरः ।
बालो वृद्धो युवा तत्त्वं तत्त्वगम्यः सखा-ह्यजः ॥ २१ ॥
अञ्जनी-सूनुरव्यग्रो ग्रामख्यातो धराधरः ।
भूर्भुवः स्वर्महर्लोके जनलोकस्तपोऽव्ययः ॥ २२ ॥
सत्यमोङ्कारगम्यश्च प्रणयो व्यापकोऽमलः ।
शिवधर्मप्रतिष्ठाता रामेष्टः फाल्गुनप्रियः ॥ २३ ॥
गोष्पदीकृत-वारीशः पूर्णकामो धरापतिः ।
रक्षोघ्नः पुण्डरीकाक्षः शरणागत-वत्सलः ॥ २४ ॥
जानकीप्राणदाता च रक्षःप्राणापहारकः ।
पूर्णः सत्यः पीतवासा दिवाकर-समप्रभः ॥ २५ ॥
देवोद्यान-विहारी च देवताभयभञ्जनः ।
भक्तोदयो भक्तलब्धो भक्तपालनतत्परः ॥ २६ ॥
द्रोणहर्ता शक्तिनेता शक्तिराक्षसमारकः ।
रक्षोघ्नो रामदूतश्च शाकिनीजीवहारकः ॥ २७ ॥
बुबुकार-हताराति-गर्वपर्वत-मर्दनः ।
हेतुस्त्वहेतुः प्रांशुश्च विश्वभर्ता जगद्गुरुः ॥ २८ ॥

से लेकर 'श्रितरुद्रश्च कामधुक् ॥ १३८३ ॥ श्लोक' पर्यन्त हनुमत्सहस्र-नाम का पाठ करे। ग्रन्थ विस्तार के कारण इस सहस्रनामस्तोत्र का हिन्दी-अर्थ नहीं किया गया।

जगन्नेता जगन्नाथो जगदीशो जनेश्वरः ।
जगद्धितो हरिः श्रीशो गरुडस्मयभञ्जनः ॥ २९ ॥
पार्थध्वजो वायुपुत्रोऽमितपुच्छोऽमितप्रभः ।
ब्रह्मपुच्छः परंब्रह्म-पुच्छो रामेष्ट एव च ॥ ३० ॥
सुग्रीवादियुतो ज्ञानी वानरो वानरेश्वरः ।
कल्पस्थायी चिरञ्जीवी प्रसन्नश्च सदाशिवः ॥ ३१ ॥
सन्नतः संगतिर्भुक्ति-मुक्तिदः कीर्तिनायकः ।
कीर्तिः कीर्तिप्रदश्चैव समुद्रः श्रीपदः शिवः ॥ ३२ ॥
भक्तोदयो भक्तगम्यो भक्तभाग्यप्रदायकः ।
उदधिक्रमणो देवः संसारभयनाशकः ॥ ३३ ॥
बालिबन्धनकृद्विश्वजेता विश्वप्रतिष्ठितः ।
लङ्कारिः कालपुरुषो लङ्केशगृहभञ्जनः ॥ ३४ ॥
भूतावासो वासुदेवो वसुस्त्रिभुवनेश्वरः ।
श्रीरामरूपः कृष्णस्तु लङ्काप्रासादभञ्जकः ॥ ३५ ॥
कृष्णः कृष्णस्तुतः शान्तः शान्तिदो विश्वपावनः ।
विश्वभोक्ताऽथ मारिघ्नो ब्रह्मचारी जितेन्द्रियः ॥ ३६ ॥
उदर्ध्वगो लाङ्गली माली लाङ्गलाहतराक्षसः ।
समीरतनुजो वीरो वीरमारो जयप्रदः ॥
जगन्मङ्गलदः पुण्यः पुण्यश्रवणकीर्तनः ॥ ३७ ॥
पुण्यकीर्तिः पुण्यगतिः जगत्पावनपावनः ।
देवेशो [१]जितमारोऽथ रामभक्तिविधायकः ॥ ३८ ॥

---

१. 'ऽजितसारोऽथ' इति पाठान्तरम् ।

ध्याता ध्येयो भगः साक्षी चेता चैतन्यविग्रहः ।
ज्ञानदः प्राणदः प्राणो जगत्प्राणसमीरणः ॥ ३९ ॥
विभीषणप्रियः शूरः पिप्पलायनसिद्धिदः ।
सिद्धिः सिद्धाश्रयः कालः कालभक्षकभञ्जनः ॥ ४० ॥
लङ्केशनिधनस्थायी लङ्कादाहक ईश्वरः ।
चन्द्र-सूर्या-ऽग्नि-नेत्रश्च कालाग्निः प्रलयान्तकः ॥ ४१ ॥
कपिलः कपिशः पुण्यराशिर्द्वादशराशिगः ।
सर्वाश्रयोऽप्रमेयात्मा रेवत्यादिनिवारकः ॥ ४२ ॥
लक्ष्मणप्राणदाता च सीताजीवनहेतुकः ।
रामध्येयो हृषीकेशो विष्णुभक्तो जटी बलिः ॥ ४३ ॥
देवारिदर्पहा होता धाता कर्त्ता जगत्प्रभुः ।
नगरग्रामपालश्च शुद्धो बुद्धो निरन्तरः ॥ ४४ ॥
निरञ्जनो निर्विकल्पो गुणातीतो भयङ्करः ॥ ४५ ॥
जानकीघनशोकोत्थ-तापहर्ता परात्परः ।
वाङ्मयः सदसद्रूपकारणं प्रकृतेःपरः ॥ ४६ ॥
भाग्यदो निर्मलो नेता पुच्छलङ्काविदाहकः ।
पुच्छबद्धयातुधानो यातुधानरिपुप्रियः ॥ ४७ ॥
छायापहारी भूतेशो लोकेशः सद्गतिप्रदः ।
प्लवङ्गमेश्वरः क्रोधः क्रोधसंरक्तलोचनः ॥ ४८ ॥
सौम्यो गुरुः काव्यकर्ता भक्तानां च वरप्रदः ।
भक्तानुकम्पी विश्वेशः पुरुहूतः पुरन्दरः ॥ ४९ ॥
क्रोधहर्ता तापहर्ता भक्तानामभयप्रदः ।
अग्निर्विभावसुर्भानुर्यमो निर्ऋतिरेव च ॥ ५० ॥

वरुणो वायुगतिमान् वायुः कूबेर ईश्वरः ।
रविश्चन्द्रः कुजः सौम्यो गुरुः काव्यः शनैश्चरः ॥ ५१ ॥
राहुः केतुर्मरुद्धाता[1] धर्ता हर्ता समीरजः ।
मशकीकृत-देवारि-दैत्यारि-मधुसूदनः ॥ ५२ ॥
कामः कपिः कामपालः कपिलो विश्वजीवनः ।
भागीरथीपदाम्भोजः सेतुबन्धविशारदः ॥ ५३ ॥
स्वाहा स्वधा हविः कव्य-हव्यवाह-प्रकाशकः ।
स्वप्रकाशो महावीरो लघुरमितविक्रमः ॥ ५४ ॥
भञ्जनो दानगतिमान् सद्गतिः पुरुषोत्तमः ।
जगदात्मा जगद्-योनिर्जगदन्तो ह्यनन्तकः ॥ ५५ ॥
विपाप्मा निष्कलङ्कोऽथ[2]महात्मा हृदहङ्कृतिः ।
खं वायुः पृथिवीरापो वह्निर्दिक्पाल एव च ॥ ५६ ॥
क्षेत्रज्ञः क्षेत्रहर्ता च पल्वलीकृतसागरः ।
हिरण्मयः पुराणश्च खेचरो भूचरो मनुः ॥ ५७ ॥
हिरण्यगर्भः सूत्रात्मा राजराजो विशाम्पतिः ।
वेदान्तवेद्य उद्गीथो वेद-वेदाङ्गपारगः ॥ ५८ ॥
प्रतिग्रामस्थितिः सद्यः स्फूर्तिदाता गुणाकरः ।
नक्षत्रमाली भूतात्मा [3]सुरभिः कल्पपादपः ॥ ५९ ॥
चिन्तामणिर्गुणनिधिः प्रजाधारो ह्यनुत्तमः ।
पुण्यश्लोकः पुरारातिर्ज्योतिष्मान् शर्करीपतिः ॥ ६० ॥

---

१. 'मरुद्धोता ध्याता' इत्यपि क्वचित्पाठः । २. 'महन्महृदहङ्कृतिः' इति ।
३. 'सुखदः' इति ।

किलिकिलाराव-सन्त्रस्त-भूत-प्रेत-पिशाचकः ।
ऋणत्रयहरः सूक्ष्मः स्थूलः सर्वगतिः पुमान् ॥ ६१ ॥
अपस्मारहरः स्मर्ता श्रुतिर्गाथा स्मृतिर्मनुः ।
स्वर्गद्वार-प्रजाद्वार-मोक्षद्वारपतीश्वरः ॥ ६२ ॥
नादरूपः परंब्रह्म ब्रह्म ब्रह्मपुरातनः ।
एकोऽनेको जनः शुक्लः स्वयंज्योतिरनाकुलः ॥ ६३ ॥
ज्योतिर्ज्योतिरनादिश्च सात्त्विको राजसस्तमः ।
तमोहर्ता निरालम्बो निराहारो गुणाकरः ॥ ६४ ॥
गुणाश्रयो गुणमयो बृहत्कर्मा बृहद्यशाः ।
बृहद्धनुर्बृहत्पादो बृहन्मूर्धा बृहत्स्वनः ॥ ६५ ॥
बृहत्कायो बृहन्नासो बृहद्बाहुर्बृहत्तनुः ।
बृहद्यत्नो बृहत्कामो बृहत्पुच्छो बृहत्करः ॥ ६६ ॥
बृहद्गतिर्बृहत्सेव्यो बृहल्लोकफलप्रदः[१] ।
बृहच्छक्ति-र्बृहद्वाञ्छाफलदो बृहदीश्वरः ॥ ६७ ॥
बृहल्लोकनुतो द्रष्टा विद्यादाता जगद्गुरुः ।
देवाचार्यः सत्यवादी ब्रह्मवादी कलाधरः ॥ ६८ ॥
सप्तपातालगामी च मलयाचलसंश्रयः ।
उत्तराशास्थितः श्रीदो दिव्यौषधिवशः खगः ॥ ६९ ॥
शाखामृगः कपीन्द्रोऽथ पुराणः प्राणचञ्चुरः ।
चतुरो ब्राह्मणो योगी योगगम्यः परावरः ॥ ७० ॥

---

१. 'गतिप्रदः' इति ।

अनादिनिधिदो व्यासो वैकुण्ठः पृथिवीपतिः ।
अपराजितो जितारातिः सदानन्दो गिरीशजः ॥ ७१ ॥
गोपालो गोपतिर्योद्धा कलिकालः परात्परः ।
मनोवेगी सदायोगी संसारभयनाशनः ॥ ७२ ॥
तत्त्वदाताऽथ तत्त्वज्ञस्तत्त्वं तत्त्वप्रकाशकः ।
शुद्धो बुद्धो नित्ययुक्तो भक्तराजो जगद्रथः ॥ ७३ ॥
प्रलयोऽमितमायश्च मायातीतो विमत्सरः ।
मायाभर्जितरक्षाश्च मायानिर्मितविष्टपः ॥ ७४ ॥
मायाश्रयश्च निर्लेपो मायानिर्वर्तकः सुखम् ।
सुखी सुखप्रदो नागो महेशकृतसंस्तवः ॥ ७५ ॥
महेश्वरः सत्यसन्धः शरभः कलिपावनः ।
रसो रसज्ञः सन्मानो रूपं चक्षुः स्तुतिः खगः ॥ ७६ ॥
घ्राणो गन्धः स्पर्शनं च स्पर्शोऽहङ्कारमानगः ।
नेति-नेतीतिगम्यश्च वैकुण्ठभजनप्रियः ॥ ७७ ॥
गिरीशो गिरिजाकान्तो दुर्वासाः कविरङ्गिराः ।
भृगु-र्वसिष्ठश्च्यवनो नारदस्तुम्बरो बलः ॥ ७८ ॥
विश्वक्षेत्रं विश्वबीजं विश्वनेत्रं च विश्वपः ।
याजको यजमानश्च पावकः पितरस्तथा ॥ ७९ ॥
श्रद्धा बुद्धिः क्षमा तन्त्रो मन्त्री मन्त्रपिता सुरः ।
राजेन्द्रो भूपती रुण्डमाली संसारसारथिः ॥ ८० ॥
नित्यः सम्पूर्णकामश्च भक्तकामधुगुत्तमः ।
गणपः केशवो भ्राता पितामाताऽथ मारुतिः ॥ ८१ ॥

सहस्रमूर्द्धा सहस्रास्यः सहस्राक्षः सहस्रपात् ।
कामजित् कामदहनः कामी कामफलप्रदः ॥ ८२ ॥

मुद्रापहारि रक्षोघ्नः क्षितिभारहरो बलः ।
नखदंष्ट्रायुधो विष्णुर्भक्ताभयवरप्रदः ॥ ८३ ॥

दर्पहा दर्पहो द्रष्टा शतमूर्तिरमूर्तिमान् ।
महानिधिर्महाभागो महाभर्गो महर्द्धिदः ॥ ८४ ॥

महाकारो महायोगी महातेजा महाद्युतिः ।
महाकर्मो महानादो महामन्त्रो महामतिः ॥ ८५ ॥

[1]महागमो महोदारो महादेवात्मको विभुः ।
रुद्रकर्मा [2]क्रूरकर्मा रत्ननाभः कृतागमः ॥ ८६ ॥

अम्भोधिलङ्घनः सिंहः सत्यधर्मा प्रमोदनः ।
जितामित्रो जयः सोमो विजयो वायुवाहनः ॥ ८७ ॥

जीवो धाता सहस्रांशुर्मुकुन्दो भूरिदक्षिणः ।
सिद्धार्थः सिद्धिदः सिद्ध-सङ्कल्पः सिद्धिहेतुकः ॥ ८८ ॥

सप्तपातालचरणः सप्तर्षिगणवन्दितः ।
सप्ताधिलङ्घनो वीरः सप्तद्वीपोरुमण्डलः ॥ ८९ ॥

सप्ताङ्गराज्यसुखदः सप्तमातृनिषेवितः ।
सप्तस्वर्लोकमुकुटः सप्तहोतृस्वराश्रयः ॥ ९० ॥

सप्तच्छन्दोनिधिः सप्तछन्दः सप्तजनाश्रयः ।
सप्तसामोपगीतश्च सप्तपातालसंश्रयः ॥ ९१ ॥

---

१. 'महाशय' इति पाठान्तरम् । २. 'कृतकर्मा' इति ।

मेघादः कीर्तिदः शोकहारी दौर्भाग्यनाशनः ।
सर्ववश्यकरो गर्भदोषहा पुत्रपौत्रदः ॥ ९२ ॥
प्रतिवादिमुखस्तम्भो रुष्टचित्तप्रसादनः ।
पराभिचारशमनो दुःखहा बन्धमोक्षदः ॥ ९३ ॥
नवद्वारपुराधारो नवद्वारनिकेतनः ।
नवनारायणस्तुत्यो नवनाथमहेश्वरः ॥ ९४ ॥
मेखली कवची खड्गी भ्राजिष्णुर्विष्णुसारथिः ।
बहुयोजन-विस्तीर्ण-पुच्छदुष्टहृतासुरः ॥ ९५ ॥
दुष्टग्रहनिहन्ता च पिशाचग्रहघातकः ।
बालग्रह-विनाशी च धर्मनेता कृपाकरः ॥ ९६ ॥
उग्रकृत्य उग्रवेग उग्रनेत्रः शतक्रतुः ।
शतमन्युस्तुतः स्तुत्यः स्तुतिः स्तोता महाबलः ॥ ९७ ॥
समग्रगुणशाली च व्यग्रो रक्षोविनाशनः ।
रक्षोऽग्निदाहो ब्रह्मेशः श्रीधरो भक्तवत्सलः ॥ ९८ ॥
मेघनादो मेघरूपो मेघवृष्टिनिवारकः ।
मेघजीवनहेतुश्च मेघश्यामः परात्मकः ॥ ९९ ॥
समीरतनयो योद्धा तत्त्वविद्याविशारदः ।
अमोघोऽमोघदृष्टिश्च दिष्टदोऽरिष्टनाशनः ॥१००॥
अर्थोऽनर्थापहारी च समर्थो रामसेवकः ।
अर्थो धन्यो सुराराति: पुण्डरीकाक्ष आत्मभूः ॥१०१॥
सङ्कर्षणो विशुद्धात्मा [१]विद्याराशिः सुरेश्वरः ।

---

१. 'विद्यादाता' इति पाठान्तरम् ।

प्रचलोद्धारको नित्यः सेतुकृद्-रामसारथिः ॥१०२॥

आनन्दः परमानन्दो मत्स्यः कूर्मो निधीश्वरः ।
वाराहो नारसिंहश्च वामनो जमदग्निजः ॥१०३॥

रामः कृष्णः शिवो बुद्धः कल्की [1]रामश्च मोहनः ।
भृङ्गी नङ्गी च चण्डी च गणेशो गणसेवितः ॥१०४॥

कर्माध्यक्षः सुरारामो विश्रामो जगतीपतिः ।
जगन्नाथः कपीशश्च सर्वावासः सदाश्रयः ॥१०५॥

सुग्रीवादिस्तुतो दान्तः सर्वकर्मप्लवङ्गमः ।
नखदारितरक्षाश्च नखयुद्ध-विशारदः ॥१०६॥

कुशलः सधनः शेषो वासुकिस्तक्षकस्तथा ।
स्वर्णवर्णो बलाढ्यश्च पुरजेता वनाशनः ॥१०७॥

कैवल्यदीपः कैवल्यो गरुडः पन्नगो गुरुः ।
क्लि-क्लीराव-हतारातिर्-बर्बपर्वत-भेदनः ॥१०८॥

वज्राङ्गो वज्रवज्रश्च भक्तवज्र-निवारकः ।
नखायुधो मणिग्रीवो ज्वालामाली च भास्करः ॥१०९॥

प्रौढप्रतापस्तपनो भक्ततापनिवारकः ।
शरणं जीवनं भोक्ता नानाचेष्टोऽथ चञ्चलः ॥११०॥

स्वस्थः स्वस्थस्थहा दुःखशातनः पवनात्मजः ।
पावनः पवनः कान्तो भक्तागःसहनो बली ॥१११॥

मेघनादरिपु-र्मेघनाद-संहृतराक्षसः ।
क्षरोऽक्षरो विनीतात्मा वानरेशः सताङ्गतिः ॥११२॥

---

१. 'रामाश्रयो हरः' इति ।

श्रीकण्ठः शितकण्ठश्च सहायो सहनायकः ।
अस्थूलस्त्वनणुर्भर्गो दिव्यः संसृतिनाशनः ॥११३॥
अध्यात्मविद्यासारश्च अध्यात्मकुशलः सुधीः ।
अकल्मषः सत्यहेतुः सत्यदः सत्यगोचरः ॥११४॥
सत्यगर्भः सत्यरूपः सत्यः सत्यपराक्रमः ।
अञ्जनीप्राणलिङ्गश्च वायुवंशोद्वहः[1] स्मृतिः ॥११५॥
भद्ररूपो रुद्ररूपः सुरूपश्चित्ररूपधृक् ।
मैनाकवन्दितः सूक्ष्मदर्शनो विजयोऽजयः ॥११६॥
क्रान्तदिङ्मण्डलो रुद्रः प्रकटीकृतविक्रमः ।
कम्बुकण्ठः प्रसन्नात्मा दुःखनाशो वृकोदरः ॥११७॥
लम्बोष्ठः कुण्डली चित्रमाली योगविदां वरः ।
विपश्चित् कविरानन्द-विग्रहोऽनल्पशासनः ॥११८॥
फाल्गुनीसूनुरव्यग्रो योगात्मा योगतत्परः ।
योगविद्योगकर्ता च योगयोनिर्दिगम्बरः ॥११९॥
अकारादि-हकारान्त-वर्णनिर्मितविग्रहः ।
उलूखलमुखः सिद्धसंस्तुतः प्रमथेश्वरः ॥१२०॥
शिलष्टजंघः शिलष्टजानुः शिलष्टपाणिः शिखाधरः ।
सुशर्माऽमितशर्मा च नारायणपरायणः ॥१२१॥
विष्णुर्भविष्णू रोचिष्णुर्ग्रसिष्णुः [2]स्थास्नुरेव च ।
हरि-रुद्राऽनुकृद्वक्ष-कम्पनो भूमिकम्पनः ॥१२२॥

---

१. 'वायुवंशोद्भवः' इति क्वचित्पाठः ।
२. 'स्थाणुः' इत्यपि पाठः ।

गुणप्रवाहः सूत्रात्मा वीतरागः स्तुतिप्रियः ।
नागकन्या-भयध्वंसी ऋतुपर्णः कपालभृत् ॥१२३॥
अनाकुलो भगोऽपापो [1]भगवान् वेदपारगः ।
अक्षरः पुरुषो लोकनाथो ऋक्षप्रभुर्दृढः ॥१२४॥
अष्टाङ्गयोग-फलभूः सत्यसन्धः पुरुष्टुतः ।
श्मशानस्थान-निलयः प्रेतविद्रावणक्षमः ॥१२५॥
पञ्चाक्षरपरः पञ्चमातृको रञ्जनध्वजः ।
योगिनीवृन्द-वन्द्यश्रीः शत्रुघ्नोऽनन्तविक्रमः ॥१२६॥
ब्रह्मचारी-न्द्रियरिपु-र्धृतदण्डो दशात्मकः ।
अप्रपञ्चः सदाकारः [2]शूरसेनाविदारकः ॥१२७॥
वृद्धः प्रमोद आनन्दः सप्तजिह्वापतिर्धरः ।
नवद्वारपुराधारः [3]प्रत्यग्रः सामगायकः ॥१२८॥
षट्चक्रधाम स्वर्लोक-भयहृन्मानदो मदः ।
सर्ववश्यकरः शक्तिरनन्तोऽनन्तमङ्गलः ॥१२९॥
अष्टमूर्तिर्नयोपेतो विरूपः सुरसुन्दरः ।
धूम्रकेतुर्महाकेतुः सत्यकेतुर्महीधरः[4] ॥१३०॥
नन्दिप्रियः स्वतन्त्रश्च मेखली डमरुप्रियः ।
लोहाङ्गः सर्वविद्धन्वी [5]षङ्गलः सर्व ईश्वरः ॥१३१॥
फलभुक् फलहस्तश्च सर्वकर्मफलप्रदः ।
धर्माध्यक्षो धर्मफलो धर्मो धर्मप्रदोऽर्थदः ॥१३२॥

---

१. 'अनपायो वेदपारगः' इति । २. 'दैत्यसेनाविदारकः' इति । ३. 'प्रत्ययः' इति । ४. 'महेरिथः' इति । ५. 'अखिलः' इति ।

पञ्चविंशति-तत्त्वज्ञस्तारको ब्रह्मतत्परः ।
त्रिमार्गवसतिर्भीमः सर्वदुष्टनिबर्हणः ॥१३३॥
ऊर्जस्वान्निष्कलः शूली मौलिर्गर्जो निशाचरः ।
रक्ताम्बरधरो रक्तो रक्तमाला-विभूषणः ॥१३४॥
वनमाली शुभाङ्गश्च श्वेतः श्वेताम्बरो युवा ।
जयोऽजयः परीवारः सहस्रवदनः कपिः ॥१३५॥
शाकिनी-डाकिनी-यक्ष-रक्षो-भूतप्रभञ्जकः ।
सद्योजातः कामगति-र्ज्ञानमूर्ति-र्यशस्करः ॥१३६॥
शम्भुतेजाः सार्वभौमो विष्णुभक्तः प्लवङ्गमः ।
चतुर्नवति-मन्त्रज्ञः पौलस्त्य-बलदर्पहा ॥१३७॥
सर्वलक्ष्मीप्रदः श्रीमानङ्गद-प्रियदर्पनुत् ।
स्मृतिबीजं सुरेशानः संसारभयनाशनः ॥१३८॥
उत्तमः श्रीपरीवारः श्रितरुद्रश्च कामधुक् ।

वाल्मीकिरुवाच

इति नाम्नां सहस्रेण स्तुतो रामेण वायुभूः ॥१३९॥
उवाच तं प्रसन्नात्मा सन्ध्यायाऽऽत्मानमव्ययम् ।

हनुमान् उवाच

ध्यानास्पदमिदं ब्रह्म मत्पुरः समुपस्थितम् ॥१४०॥

फलश्रुति

वाल्मीकि ने कहा—इस प्रकार सहस्रनाम से राम ने हनुमान्जी की स्तुति की ॥ १३९ ॥

तत्पश्चात् परात्पर परब्रह्म परमेश्वर मर्यादा-पुरुषोत्तम भगवान् रामचन्द्रजी का प्रसन्न चित्त हो अपने हृदय में ध्यान कर हनुमान्जी

स्वामिन्!कृपानिधे!राम!ज्ञातोऽसि कपिना मया ।
त्वद्ध्याननिरता लोकाः किं मां जपसि सादरम् ॥१४१॥
तवागमनहेतुश्च ज्ञातो ह्यत्र मयाऽनघ ! ।
कर्तव्यं मम ! किं राम ! तथा ब्रूहि च राघव ! ॥१४२॥
इति प्रचोदितो रामः प्रहृष्टात्मेदमब्रवीत् ।

श्रीराम उवाच

दुर्जयः खलु वैदेहीं गृहीत्वा कोऽपि निर्गतः ॥१४३॥
हत्वा तं निर्घृणं वीर ! आनयस्व कपीश्वर ! ।
मम दास्यं कुरु सखे ! भव विश्वसुखङ्करः ॥१४४॥
तथा कृते त्वया वीर ! मम कार्यं भविष्यति ।
ओमित्याज्ञां तु शिरसा गृहीत्वा स कपीश्वरः ॥१४५॥

ने इस प्रकार कहा—एक मात्र ध्यानैकगम्य परब्रह्मस्वरूप आप मेरे सम्मुख उपस्थित हुए हैं। हे स्वामिन् ! कृपासागर ! राम ! मैं तुच्छबुद्धि वानरस्वरूप वाला होते हुए भी मैंने आपको पहचान लिया। समस्त चराचर मात्र तो आपके ही ध्यान में निरन्तर रत रहते हैं और आप बड़े ही श्रद्धापूर्वक मेरी स्तुति करते हैं ॥ १२६½-१४१ ॥

त्रिविध तापपाप रहित राघव ! इस स्थान पर आपके आने का कारण मैं भलीभाँति समझ गया हूँ । अतः हे राम ! मुझे आप निःसंकोच आज्ञा प्रदान कीजिए कि मैं आपके लिए अब क्या करूँ ? ॥ १४२ ॥ इस प्रकार हनुमान्जी के कहने पर प्रसन्न-चित्त हो, मर्यादा-पुरुषोत्तम भगवान् राम ने हनुमान्जी से इस प्रकार कहा कि न जाने किस वीर व्यक्ति ने जानकी का अपहरण किया । अतः हे कपीश्वर ! परमवीर ! मैं यही आज्ञा प्रदान करता हूँ कि उस दुष्ट को मार कर शीघ्रातिशीघ्र मेरे सम्मुख ले आओ, और उसे मेरे अधीन करो। तथा हे मित्र ! तुम समस्त प्राणिमात्र को सुख प्रदान करो। हे वीर,

विधेयं विधिवत्तत्र चकार स शिवः स्वयम् ।
इदं नाम्नां सहस्रं तु योऽधीते प्रत्यहं नरः ॥१४६॥
दुःखौघो नश्यते तस्य सम्पत्तिर्वर्धते चिरम् ।
वश्यं चतुर्विधं तस्य भवत्येव न संशयः ॥१४७॥

राजानो राजपुत्राश्च राजकार्यश्च मन्त्रिणः ।
त्रिकालपठनादस्य दृश्यान्ते च त्रिपक्षतः ॥१४८॥
अश्वत्थमूले जपतां नास्ति वैरिकृतं भयम् ।
त्रिकालपठनात्तस्य सिद्धिः स्यात् करसंस्थिता ॥१४९॥

ब्राह्मे मुहूर्त्ते चोत्थाय प्रत्यहं यः पठेन्नरः ।
ऐहिका-ऽऽमुष्मिकं सोऽपि लभते नाऽत्र संशयः ॥१५०॥

आपके इस प्रकार कार्य करने पर मेरा समस्त अभीष्ट कार्य सिद्ध होगा। तत्पश्चात् कपीश्वर हनुमान् ने अपने इष्ट देव प्रभु राम की आज्ञा को शिरोधार्य कर, रुद्रावतार श्रीहनुमान्जी ने भलीभाँति सीताजी की खोज की। इस सहस्रनामस्तोत्र का जो प्राणी प्रतिदिन पाठ करता है, उसके समस्त दुःख नष्ट होते हैं, तथा उसकी ऋद्धि-सिद्धि चिर काल तक स्थिर रहती है, और निःसन्देह धर्म, अर्थ, काम, मोक्ष चतुर्विध पुरुषार्थ उसके अधीन रहते हैं॥ १४२ -१४७॥

प्रतिदिन तीनपक्ष अर्थात् डेढ़ मास तक इस 'हनुमत्सहस्रनामस्तोत्र' के त्रिकाल पाठ करने से राजा, राजपुत्र, मन्त्रीगण सभी अपने अधीन हो जाते हैं॥ १४८॥ पीपल के जड़ पर बैठकर इस स्तोत्र का पाठ करने से शत्रुजन्य भय नष्ट होता है। उसी प्रकार त्रिकाल पाठ करने से समस्त सिद्धियाँ प्राप्त होती हैं॥ १४९॥

ब्राह्ममूहूर्त में उठकर जो प्राणी प्रतिदिन इस स्तोत्र का पाठ करता है वह निःसन्देह इहलोक तथा परलोक के सुख का भागी

संग्रामे सन्निविष्टानां वैरिविद्रावणं परम् ।
ज्वरा-ऽपस्मार-शमनं गुल्मादीनां निवारणम् ॥१५१॥
साम्राज्य-सुखसम्पत्तिदायकं जपतां नृणाम् ।
स्वर्गं मोक्षं समाप्नोति रामचन्द्रप्रसादतः ॥१५२॥
य इदं पठते नित्यं श्रावयेद् वा समाहितः ।
सर्वान् कामानवाप्नोति वायुपुत्रप्रसादतः ॥१५३॥

इति पण्डितश्रीशिवदत्तमिश्रशास्त्रिकृत-हनुमद्-रहस्ये ब्रह्माण्डपुराणे उत्तरखण्डे श्रीरामकृतं हनुमत्सहस्रनामस्तोत्रं सम्पूर्णम् ।

[इति हनुमत्पञ्चाङ्गं समाप्तम् ।]

होता है ॥ १५० ॥ इस स्तोत्र का पाठ करने से रणस्थल में शत्रुओं को नष्ट कर विजय प्राप्त करता है। उसी प्रकार इस स्तोत्र के पाठ करने से ज्वर, अपस्मार (मृगी एवं हिस्टीरिया) तथा गुल्म आदि समस्त रोग नष्ट होते हैं। तथा साम्राज्य, सुख, सम्पत्ति आदि प्राप्त होते हैं और मर्यादा पुरुषोत्तम भगवान् रामचन्द्र की कृपा से अन्त में स्वर्ग एवं मोक्ष भी प्राप्त होता है ॥ १५२ ॥ जो प्राणी इस स्तोत्र का नित्य पाठ करता है एवं सुनता है (अर्थात् श्रोता तथा वक्ता दोनों ही) वायुपुत्र श्रीहनुमान्जी की कृपा से उसके समस्त मनोरथ सिद्ध होते हैं ॥ १५३ ॥

इस प्रकार श्रीपण्डितशिवदत्तमिश्रशास्त्रिकृत 'शिवदत्ती' हिन्दीव्याख्या-सहित हनुमद्-रहस्य में ब्रह्माण्डपुराण के उत्तरखण्ड में श्रीरामकृत हनुमत्सहस्रनामस्तोत्र समाप्त ।

---

१. पटलं पद्धती वर्मं तथा नाम-सहस्रकम् ।
स्तोत्राणि चेति पञ्चाङ्गं देवतोपासने स्मृतम् ॥
कवचं देवतागात्रं पटलं देवताशिरः ।
पद्धतिर्देवहस्तौ तु मुखं साहस्रकं स्मृतम् ॥
स्तोत्राणि देवतापादौ पञ्चाङ्गं पञ्चभिः स्मृतम् ।

हनुमत्सहस्रनामावली

अस्य श्रीहनुमत्सहस्रनामस्तोत्रमन्त्रस्य ब्रह्मा ऋषिः, हनुमान् देवता, अनुष्टुप् छन्दः, रां बीजं, मं शक्तिः, श्रीहनुमत्प्रीत्यर्थं तद्दिव्यसहस्रनामभिरमुकसंख्यार्कपुष्पादि-द्रव्यसमर्पणे विनियोगः ।

ध्यानम्

ध्यायेद् बालदिवाकर-द्युतिनिभं देवारिदर्पापहं
देवेन्द्रप्रमुख-प्रशस्तयशसं देदीप्यमानं रुचा ।
सुग्रीवादि-समस्त-वानरयुतं सुव्यक्ततत्त्वप्रियं
संरक्तारुण-लोचनं पवनजं पीताम्बरालङ्कृतम् ॥१॥
उद्यदादित्यसङ्काशमुदारभुजविक्रमम् ।
कन्दर्पकोटि-लावण्यं सर्वविद्या-विशारदम् ॥२॥
श्रीरामहृदयानन्दं भक्तकल्पमहीरुहम् ।
अभयं वरदं दोर्भ्यां चिन्तयेन्मारुतात्मजम् ॥३॥

ततस्तत्तन्नामभिः प्रत्येकं प्रणवादिभिः नमोऽन्तैरर्क-पुष्पादिसमर्पणं कुर्यात् । तद्यथा–

नामावली

१. ॐ हनुमते नमः
२. ॐ श्रीप्रदाय नमः
३. ॐ वायुपुत्राय नमः
४. ॐ रुद्राय नमः
५. ॐ अघनाय नमः
६. ॐ अजराय नमः
७. ॐ अमृत्यवे नमः
८. ॐ वीरवीराय नमः

९ ॐ ग्रामवासाय नमः
१० ॐ जलाश्रयाय नमः
११ ॐ धनदाय नमः
१२ ॐ निर्गुणाय नमः
१३ ॐ कायाय नमः
१४ ॐ वीराय नमः
१५ ॐ निधिपतये नमः
१६ ॐ मुनये नमः
१७ ॐ पिङ्गाक्षाय नमः
१८ ॐ वरदाय नमः
१९ ॐ वाग्मिने नमः
२० ॐ सीताशोकविनाश-
नाय नमः
२१ ॐ शिवाय नमः
२२ ॐ शर्वाय नमः
२३ ॐ पराय नमः
२४ ॐ अव्यक्ताय नमः
२५ ॐ व्यक्तव्यक्ताय नमः
२६ ॐ रसाधराय नमः
२७ ॐ पिङ्गकेशाय नमः
२८ ॐ पिङ्गरोम्णे नमः
२९ ॐ श्रुतिगम्याय नमः

३० ॐ सनातनाय नमः
३१ ॐ अनादये नमः
३२ ॐ भगवते नमः
३३ ॐ देवाय नमः
३४ ॐ विश्वहेतवे नमः
३५ ॐ निराश्रयाय नमः
३६ ॐ आरोग्यकर्त्रे नमः
३७ ॐ विश्वेशाय नमः
३८ ॐ विश्वनायकाय नमः
३९ ॐ हरीश्वराय नमः
४० ॐ भर्गाय नमः
४१ ॐ रामाय नमः
४२ ॐ रामभक्ताय नमः
४३ ॐ कल्याणाय नमः
४४ ॐ प्रकृतिस्थिराय नमः
४५ ॐ विश्वम्भराय नमः
४६ ॐ विश्वमूर्तये नमः
४७ ॐ विश्वाकाराय नमः
४८ ॐ विश्वदाय नमः
४९ ॐ विश्वात्मने नमः
५० ॐ विश्वसेव्याय नमः
५१ ॐ विश्वाय नमः

५२ ॐ विश्वहराय नमः
५३ ॐ रवये नमः
५४ ॐ विश्वचेष्टाय नमः
५५ ॐ विश्वागम्याय नमः
५६ ॐ विश्वध्येयाय नमः
५७ ॐ कलाधराय नमः
५८ ॐ प्लवङ्गमाय नमः
५९ ॐ कपिश्रेष्ठाय नमः
६० ॐ ज्येष्ठाय नमः
६१ ॐ विद्याय नमः
६२ ॐ वनेचराय नमः
६३ ॐ बालाय नमः
६४ ॐ वृद्धाय नमः
६५ ॐ यूने नमः
६६ ॐ तत्त्वाय नमः
६७ ॐ तत्त्वगम्याय नमः
६८ ॐ सख्ये नमः
६९ ॐ अजाय नमः
७० ॐ अञ्जनीसूनवे नमः
७१ ॐ अव्यग्राय नमः
७२ ॐ ग्रामस्वान्ताय नमः
७३ ॐ धराधराय नमः

७४. ॐ भूर्लोकाय नमः
७५. ॐ भुवर्लोकाय नमः
७६. ॐ स्वर्लोकाय नमः
७७. ॐ महर्लोकाय नमः
७८. ॐ जनलोकाय नमः
७९. ॐ तपसे नमः
८०. ॐ अव्ययाय नमः
८१. ॐ सत्याय नमः
८२. ॐ ॐकारगम्याय नमः
८३. ॐ प्रणवाय नमः
८४. ॐ व्यापकाय नमः
८५. ॐ अमलाय नमः
८६. ॐ शिवाय नमः
८७. ॐ धर्मप्रतिष्ठात्रे नमः
८८. ॐ रामेष्टाय नमः
८९. ॐ फाल्गुनप्रियाय नमः
९०. ॐ गोष्पदिने नमः
९१. ॐ कृतवारीशाय नमः
९२. ॐ पूर्णकामाय नमः
९३. ॐ धराधिपाय नमः
९४. ॐ रक्षोघ्नाय नमः
९५. ॐ पुण्डरीकाक्षाय नमः

९६ ॐ शरणागतवत्सलाय नमः
९७ ॐ जानकीप्राणदात्रे नमः
९८ ॐ रक्षःप्राणापहारकाय नमः
९९ ॐ पूर्णाय नमः
१०० ॐ सत्याय नमः
१०१ ॐ पीतवाससे नमः
१०२ ॐ दिवाकरसमप्रभाय नमः
१०३ ॐ द्रोणहर्त्रे नमः
१०४ ॐ शक्तिनेत्रे नमः
१०५ ॐ शक्तये नमः
१०६ ॐ राक्षसमारकाय नमः
१०७ ॐ रक्षोघ्नाय नमः
१०८ ॐ रामदूताय नमः
१०९ ॐ शाकिनीजीविकाहराय नमः
११० ॐ भुभुकारहतारातये नमः
१११ ॐ गर्वाय नमः
११२ ॐ पर्वतच्छेदनाय नमः
११३ ॐ हेतवे नमः
११४ ॐ अहेतवे नमः
११५ ॐ प्रांशवे नमः
११६ ॐ विश्वभर्त्रे नमः
११७ ॐ जगद्गुरवे नमः
११८ ॐ जगन्नेत्रे नमः
११९ ॐ जगन्नाथाय नमः
१२० ॐ जगदीशाय नमः
१२१ ॐ जनेश्वराय नमः
१२२ ॐ जगच्छ्रिताय नमः
१२३ ॐ हरये नमः
१२४ ॐ श्रीशाय नमः
१२५ ॐ गरुडस्मयभञ्जकाय नमः
१२६ ॐ पार्थध्वजाय नमः
१२७ ॐ वायुपुत्राय नमः
१२८ ॐ अमितपुच्छाय नमः
१२९ ॐ अमितप्रभाय नमः
१३० ॐ ब्रह्मपुच्छाय नमः
१३१ ॐ परब्रह्मणे नमः
१३२ ॐ पुच्छरोमेष्टाय नमः
१३३ ॐ सुग्रीवादियुताय नमः

१३४ ॐ ज्ञानिने नमः
१३५ ॐ वानराय नमः
१३६ ॐ वानरेश्वराय नमः
१३७ ॐ कल्पस्थायिने नमः
१३८ ॐ चिरंजीविने नमः
१३९ ॐ प्रसन्नाय नमः
१४० ॐ सदाशिवाय नमः
१४१ ॐ सन्नताय नमः
१४२ ॐ सद्गतये नमः
१४३ ॐ युक्तये नमः
१४४ ॐ मुक्तिदाय नमः
१४५ ॐ कीर्तिनायकाय नमः
१४६ ॐ कीर्तये नमः
१४७ ॐ कीर्तिप्रदाय नमः
१४८ ॐ समुद्राय नमः
१४९ ॐ श्रीप्रदाय नमः
१५० ॐ शिवाय नमः
१५१ ॐ उदधिक्रमणाय नमः
१५२ ॐ देवाय नमः
१५३ ॐ संसारभयनाशनाय नमः
१५४ ॐ वालिबन्धकृते नमः
१५५ ॐ विश्वजेत्रे नमः
१५६ ॐ विश्वप्रतिष्ठिताय नमः
१५७ ॐ लङ्कारये नमः
१५८ ॐ कालपुरुषाय नमः
१५९ ॐ लङ्केशगृहभञ्जनाय नमः
१६० ॐ भूतावासाय नमः
१६१ ॐ वासुदेवाय नमः
१६२ ॐ वसवे नमः
१६३ ॐ त्रिभुवनेश्वराय नमः
१६४ ॐ श्रीरामरूपाय नमः
१६५ ॐ कृष्णाय नमः
१६६ ॐ लङ्काप्रासादभञ्जकाय नमः
१६७ ॐ कृष्णाय नमः
१६८ ॐ कृष्णस्तुताय नमः
१६९ ॐ शान्ताय नमः
१७० ॐ शान्तिदाय नमः
१७१ ॐ विश्वपावनाय नमः
१७२ ॐ विश्वभोक्त्रे नमः
१७३ ॐ मारिघ्नाय नमः

१७४ ॐ ब्रह्मचारिणे नम
१७५ ॐ जितेन्द्रियाय नमः
१७६ ॐ ऊर्ध्वगाय नमः
१७७ ॐ लाङ्गूलिने नमः
१७८ ॐ मालिने नमः
१७९ ॐ लाङ्गूलाहतराक्ष-
साय नमः
१८० ॐ समीरतनुजाय नमः
१८१ ॐ वीराय नमः
१८२ ॐ वीरमाराय नमः
१८३ ॐ जयप्रदाय नमः
१८४ ॐ जगन्मङ्गलदाय नमः
१८५ ॐ पुण्याय नमः
१८६ ॐ पुण्यश्रवणकीर्तनाय
नमः
१८७ ॐ पुण्यकीर्तये नमः
१८८ ॐ पुण्यगीतये नमः
१८९ ॐ जगत्पावनपावनाय
नमः
१९० ॐ देवेशाय नमः
१९१ ॐ मितमाराय नमः
१९२ ॐ रामभक्तिविधाय-
काय नमः

१९३ ॐ धात्रे नमः
१९४ ॐ ध्येयाय नमः
१९५ ॐ भगाय नमः
१९६ ॐ साक्षिणे नमः
१९७ ॐ चेत्रे नमः
१९८ ॐ चैतन्यविग्रहाय नमः
१९९ ॐ ज्ञानदाय नमः
२०० ॐ प्राणदाय नमः
२०१ ॐ प्राणाय नमः
२०२ ॐ जगत्प्राणाय नमः
२०३ ॐ समीरणाय नमः
२०४ ॐ विभीषणप्रियाय नमः
२०५ ॐ शूराय नमः
२०६ ॐ पिप्पलाश्रयाय नमः
२०७ ॐ सिद्धिदाय नमः
२०८ ॐ सिद्धाश्रयाय नमः
२०९ ॐ कालाय नमः
२१० ॐ कालभक्षकाय नमः
२११ ॐ भंजिताय नमः
२१२ ॐ लङ्केशनिधन-
स्थायिने नमः
२१३ ॐ लङ्काविदाहकाय नमः

२१४ ॐ ईश्वराय नमः
२१५ ॐ चन्द्रसूर्याग्निनेत्राय नमः
२१६ ॐ कालाग्नये नमः
२१७ ॐ प्रलयान्तकाय नमः
२१८ ॐ कपीनाय नमः
२१९ ॐ कपीशाय नमः
२२० ॐ पुण्यराशये नमः
२२१ ॐ द्वादशराशिगाय नमः
२२२ ॐ सर्वाश्रयाय नमः
२२३ ॐ अप्रमेयात्मने नमः
२२४ ॐ रेवत्यादिनिवारकाय नमः
२२५ ॐ लक्ष्मणप्राणदात्रे नमः
२२६ ॐ सीताजीवनहेतुकाय नमः
२२७ ॐ रामध्येयाय नमः
२२८ ॐ हृषीकेशाय नमः
२२९ ॐ विष्णुभक्ताय नमः
२३० ॐ जटिने नमः
२३१ ॐ बलिने नमः
२३२ ॐ सिद्धाय नमः
२३३ ॐ देवादिदर्पघ्ने नमः
२३४ ॐ होत्रे नमः
२३५ ॐ धात्रे नमः
२३६ ॐ कर्त्रे नमः
२३७ ॐ जगत्प्रभवे नमः
२३८ ॐ नगरग्रामपालाय नमः
२३९ ॐ शुद्धाय नमः
२४० ॐ बुद्धाय नमः
२४१ ॐ निरन्तनाय नमः
२४२ ॐ निरञ्जनाय नमः
२४३ ॐ निर्विकल्पाय नमः
२४४ ॐ गुणातीताय नमः
२४५ ॐ भयङ्कराय नमः
२४६ ॐ हनुमते नमः
२४७ ॐ दुराराध्याय नमः
२४८ ॐ तपस्साध्याय नमः
२४९ ॐ अमरेश्वराय नमः
२५० ॐ जानकीघनशोकोत्थतापहर्त्रे नमः
२५१ ॐ पराशराय नमः
२५२ ॐ वाङ्मयाय नमः

२५३ ॐ सदसद्रूपाय नमः
२५४ ॐ कारणाय नमः
२५५ ॐ प्रकृतेःपराय नमः
२५६ ॐ भाग्यदाय नमः
२५७ ॐ निर्मलाय नमः
२५८ ॐ नेत्रे नमः
२५९ ॐ पुच्छलङ्काविदाहकाय नमः
२६० ॐ पुच्छबद्धाय नमः
२६१ ॐ यातुधानाय नमः
२६२ ॐ यातुधानरिपुप्रियाय नमः
२६३ ॐ छायापहारिणे नमः
२६४ ॐ भूतेशाय नमः
२६५ ॐ लोकेशाय नमः
२६६ ॐ सद्गतिप्रदाय नमः
२६७ ॐ प्लवङ्गेश्वराय नमः
२६८ ॐ क्रोधाय नमः
२६९ ॐ क्रोधसंरक्तलोचनाय नमः
२७० ॐ क्रोधहर्त्रे नमः
२७१ ॐ तापहर्त्रे नमः
२७२ ॐ भक्ताभयाय नमः
२७३ ॐ वरप्रदाय नमः
२७४ ॐ भक्तानुकम्पिने नमः
२७५ ॐ विश्वेशाय नमः
२७६ ॐ पुरुहूताय नमः
२७७ ॐ पुरन्दराय नमः
२७८ ॐ अग्नये नमः
२७९ ॐ विभावसवे नमः
२८० ॐ भास्वते नमः
२८१ ॐ यमाय नमः
२८२ ॐ निर्ऋतये नमः
२८३ ॐ वरुणाय नमः
२८४ ॐ वायुगतिमते नमः
२८५ ॐ वायवे नमः
२८६ ॐ कुबेराय नमः
२८७ ॐ ईश्वराय नमः
२८८ ॐ रवये नमः
२८९ ॐ चन्द्राय नमः
२९० ॐ कुजाय नमः
२९१ ॐ सौम्याय नमः
२९२ ॐ गुरवे नमः
२९३ ॐ काव्याय नमः

२९४ ॐ शनैश्चराय नमः
२९५ ॐ राहवे नमः
२९६ ॐ केतवे नमः
२९७ ॐ मरुते नमः
२९८ ॐ होत्रे नमः
२९९ ॐ धात्रे नमः
३०० ॐ हर्त्रे नमः
३०१ ॐ समीरजाय नमः
३०२ ॐ मशकीकृतदेवारये नमः
३०३ ॐ दैत्यारये नमः
३०४ ॐ मधुसूदनाय नमः
३०५ ॐ कामाय नमः
३०६ ॐ कपये नमः
३०७ ॐ कामपालाय नमः
३०८ ॐ कपिलाय नमः
३०९ ॐ विश्वजीवनाय नमः
३१० ॐ भागीरथीपदाम्भोजाय नमः
३११ ॐ सेतुबन्धविशारदाय नमः
३१२ ॐ स्वाहाकाराय नम
३१३ ॐ स्वधाकाराय नमः
३१४ ॐ हविषे नमः
३१५ ॐ कव्याय नमः
३१६ ॐ हव्याय नमः
३१७ ॐ प्रकाशकाय नमः
३१८ ॐ स्वप्रकाशाय नमः
३१९ ॐ महावीराय नमः
३२० ॐ लघवे नमः
३२१ ॐ अमितविक्रमाय नमः
३२२ ॐ भण्डानोड्डानगतिमते नमः
३२३ ॐ सद्गतये नमः
३२४ ॐ पुरुषोत्तमाय नमः
३२५ ॐ जगदात्मने नमः
३२६ ॐ जगद्योनये नमः
३२७ ॐ जगदन्ताय नमः
३२८ ॐ अनन्तकाय नमः
३२९ ॐ विपाप्मने नमः
३३० ॐ निष्कलङ्काय नमः
३३१ ॐ महते नमः
३३२ ॐ महदहङ्कृतये नमः

३३३ ॐ खाय नमः
३३४ ॐ वायवे नमः
३३५ ॐ पृथिव्यै नमः
३३६ ॐ आपाय नमः
३३७ ॐ वह्नये नमः
३३८ ॐ दिक्कालाय नमः
३३९ ॐ एकस्थाय नमः
३४० ॐ क्षेत्रज्ञाय नमः
३४१ ॐ क्षेत्रहन्त्रे नमः
३४२ ॐ पल्वलीकृतसागराय नमः
३४३ ॐ हिरण्मयाय नमः
३४४ ॐ पुराणाय नमः
३४५ ॐ खेचराय नमः
३४६ ॐ भूचराय नमः
३४७ ॐ मनसे नमः
३४८ ॐ हिरण्यगर्भाय नमः
३४९ ॐ सुत्राम्णे नमः
३५० ॐ राजराजाय नमः
३५१ ॐ विशाम्पतये नमः
३५२ ॐ वेदान्तवेद्याय नमः
३५३ ॐ उद्गीथाय नमः
३५४ ॐ वेदाय नमः
३५५ ॐ वेदाङ्गपारगाय नमः
३५६ ॐ प्रतिग्रामस्थितये नमः
३५७ ॐ सद्यःस्फूर्तिदात्रे नमः
३५८ ॐ गुणाकाराय नमः
३५९ ॐ नक्षत्रमालिने नमः
३६० ॐ भूतात्मने नमः
३६१ ॐ सुरभये नमः
३६२ ॐ कल्पपादपाय नमः
३६३ ॐ चिन्तामणये नमः
३६४ ॐ गुणनिधये नमः
३६५ ॐ प्रजाद्वाराय नमः
३६६ ॐ अनुत्तमाय नमः
३६७ ॐ पुण्यश्लोकाय नमः
३६८ ॐ पुरारातये नमः
३६९ ॐ ज्योतिष्मते नमः
३७० ॐ शर्वरीपतये नमः
३७१ ॐ किलकिलिरावसंत्रस्त-भूत-प्रेत-पिशाचकाय नमः
३७२ ॐ ऋणत्रयहराय नमः
३७३ ॐ सूक्ष्माय नमः

३७४ ॐ स्थूलाय नमः
३७५ ॐ सर्वगतये नमः
३७६ ॐ पुंसे नमः
३७७ ॐ अपस्मारहराय नमः
३७८ ॐ स्मर्त्रे नमः
३७९ ॐ श्रुतये नमः
३८० ॐ गाथायै नमः
३८१ ॐ स्मृतये नमः
३८२ ॐ मनवे नमः
३८३ ॐ स्वर्गद्वाराय नमः
३८४ ॐ प्रजाद्वाराय नमः
३८५ ॐ मोक्षद्वाराय नमः
३८६ ॐ यतीश्वराय नमः
३८७ ॐ नादरूपाय नमः
३८८ ॐ परब्रह्मणे नमः
३८९ ॐ ब्रह्मणे नमः
३९० ॐ ब्रह्मपुरातनाय नमः
३९१ ॐ एकाय नमः
३९२ ॐ अनेकाय नमः
३९३ ॐ जनाय नमः
३९४ ॐ शुक्लाय नमः
३९५ ॐ स्वयंज्योतिषे नमः
३९६ ॐ अनाकुलाय नमः
३९७ ॐ ज्योतिर्ज्योतिषे नमः
३९८ ॐ अनादये नमः
३९९ ॐ सात्त्विकाय नमः
४०० ॐ राजसाय नमः
४०१ ॐ तमसे नमः
४०२ ॐ तमोहर्त्रे नमः
४०३ ॐ निरालम्बाय नमः
४०४ ॐ निराकाराय नमः
४०५ ॐ गुणाकराय नमः
४०६ ॐ गुणाश्रयाय नमः
४०७ ॐ गुणमयाय नमः
४०८ ॐ बृहत्कायाय नमः
४०९ ॐ बृहद्यशसे नमः
४१० ॐ बृहद्धनुषे नमः
४११ ॐ बृहत्पादाय नमः
४१२ ॐ बृहन्मूर्ध्ने नमः
४१३ ॐ बृहत्स्वनाय नमः
४१४ ॐ बृहत्कायाय नमः
४१५ ॐ बृहन्नासाय नमः
४१६ ॐ बृहद्बाहवे नमः
४१७ ॐ बृहत्तनवे नमः

४१८ ॐ बृहद्यत्नाय नमः
४१९ ॐ बृहत्कार्याय नमः
४२० ॐ बृहत्पुच्छाय नमः
४२१ ॐ बृहत्कराय नमः
४२२ ॐ बृहद्गतये नमः
४२३ ॐ बृहत्सेव्याय नमः
४२४ ॐ बृहल्लोकाय नमः
४२५ ॐ फलप्रदाय नमः
४२६ ॐ बृहच्छक्तये नमः
४२७ ॐ बृहद्वाञ्छाफलदाय नमः
४२८ ॐ बृहदीश्वराय नमः
४२९ ॐ बृहल्लोकनुताय नमः
४३० ॐ द्रष्ट्रे नमः
४३१ ॐ विद्योद्गात्रे नमः
४३२ ॐ जगद्गुरवे नमः
४३३ ॐ देवाचार्याय नमः
४३४ ॐ सत्यवादिने नमः
४३५ ॐ ब्रह्मवादिने नमः
४३६ ॐ कलाधराय नमः
४३७ ॐ सप्तपातालगामिने नमः
४३८ ॐ मलयाचलसंश्रयाय नमः
४३९ ॐ उत्तराशास्थितायनमः
४४० ॐ श्रीदाय नमः
४४१ ॐ दिव्यौषधीवशाय नमः
४४२ ॐ खगाय नमः
४४३ ॐ शाखामृगाय नमः
४४४ ॐ कपीन्द्राय नमः
४४५ ॐ पुराणाय नमः
४४६ ॐ प्राणचञ्चुराय नमः
४४७ ॐ चतुराय नमः
४४८ ॐ ब्राह्मणाय नमः
४४९ ॐ योगिने नमः
४५० ॐ योगगम्याय नमः
४५१ ॐ परावराय नमः
४५२ ॐ अनादये नमः
४५३ ॐ निधनाय नमः
४५४ ॐ व्यासाय नमः
४५५ ॐ वैकुण्ठाय नमः
४५६ ॐ पृथिवीपतये नमः

४५७ ॐ अपराजितये नमः
४५८ ॐ जितारातये नमः
४५९ ॐ सदानन्ददाय नमः
४६० ॐ ईशित्रे नमः
४६१ ॐ गोपालाय नमः
४६२ ॐ गोपतये नमः
४६३ ॐ योध्रे नमः
४६४ ॐ कलये नमः
४६५ ॐ कालाय नमः
४६६ ॐ परात्पराय नमः
४६७ ॐ मनोवेगिने नमः
४६८ ॐ सदायोगिने नमः
४६९ ॐ संहारभयनाशनाय नमः
४७० ॐ तत्त्वदात्रे नमः
४७१ ॐ तत्त्वज्ञाय नमः
४७२ ॐ तत्त्वाय नमः
४७३ ॐ तत्त्वप्रकाशाय नमः
४७४ ॐ शुद्धाय नमः
४७५ ॐ बुधाय नमः
४७६ ॐ नित्ययुक्ताय नमः
४७७ ॐ भक्ताकाराय नमः
४७८ ॐ जगद्रथाय नमः
४७९ ॐ प्रलयाय नमः
४८० ॐ अमितमयाय नमः
४८१ ॐ मायातीताय नमः
४८२ ॐ विमत्सराय नमः
४८३ ॐमायानिर्जितरक्षसेनमः
४८४ ॐ मायानिर्मित-विष्टपाय नमः
४८५ ॐ मायाश्रयाय नमः
४८६ ॐ निर्लेपाय नमः
४८७ ॐ मायानिर्वर्त्तकाय नमः
४८८ ॐ सुखाय नमः
४८९ ॐ सुखाऽसुखप्रदाय नमः
४९० ॐ नागाय नमः
४९१ ॐमहेशकृतसंस्तवाय नमः
४९२ ॐ महेश्वराय नमः
४९३ ॐ सत्सयन्धाय नमः
४९४ ॐ शरभाय नमः
४९५ ॐ कलिपावनाय नमः
४९६ ॐ रसाय नमः
४९७ ॐ रसज्ञाय नमः
४९८ ॐ सन्मानाय नमः

४९९ ॐ रूपाय नमः
५०० ॐ चक्षुषे नमः
५०१ ॐ स्तुतये नमः
५०२ ॐ रवाय नमः
५०३ ॐ प्राणाय नमः
५०४ ॐ गन्धाय नमः
५०५ ॐ स्पर्शाय नमः
५०६ ॐ स्पर्शनाय नमः
५०७ ॐ अहङ्कारमानगाय नमः
५०८ ॐ नेतिनेतीतिगम्याय नमः
५०९ ॐ वैकुण्ठभजनप्रियाय नमः
५१० ॐ गिरिशाय नमः
५११ ॐ गिरिजाकान्ताय नमः
५१२ ॐ दुर्वाससे नमः
५१३ ॐ कवये नमः
५१४ ॐ अङ्गिरसे नमः
५१५ ॐ भृगवे नमः
५१६ ॐ वासिष्ठाय नमः
५१७ ॐ च्यवनाय नमः
५१८ ॐ नारदाय नमः
५१९ ॐ तुम्बराय नमः

५२० ॐ अमलाय नमः
५२१ ॐ विश्वक्षेत्राय नमः
५२२ ॐ विश्वबीजाय नमः
५२३ ॐ विश्वनेत्राय नमः
५२४ ॐ विश्वपाय नमः
५२५ ॐ याजकाय नमः
५२६ ॐ यजमानाय नमः
५२७ ॐ पावकाय नमः
५२८ ॐ पित्रे नमः
५२९ ॐ श्रद्धायै नमः
५३० ॐ बुद्ध्यै नमः
५३१ ॐ क्षमायै नमः
५३२ ॐ तन्द्रायै नमः
५३३ ॐ मन्त्राय नमः
५३४ ॐ मन्त्रयित्रे नमः
५३५ ॐ सुराय नमः
५३६ ॐ राजेन्द्राय नमः
५३७ ॐ भूपतये नमः
५३८ ॐ रुण्डमालिने नमः
५३९ ॐ संसारसारथये नमः
५४० ॐ नित्याय नमः
५४१ ॐ सम्पूर्णकामाय नमः

५४२ ॐ भक्तकामदुघे नमः
५४३ ॐ उत्तमाय नमः
५४४ ॐ गणपाय नमः
५४५ ॐ केशवाय नमः
५४६ ॐ भ्रात्रे नमः
५४७ ॐ पित्रे नमः
५४८ ॐ मात्रे नमः
५४९ ॐ मारुतये नमः
५५० ॐ सहस्रमूर्ध्ने नमः
५५१ ॐ सहस्रास्याय नमः
५५२ ॐ सहस्राक्षाय नमः
५५३ ॐ सहस्रपादाय नमः
५५४ ॐ कामजिते नमः
५५५ ॐ कामदहनाय नमः
५५६ ॐ कामाय नमः
५५७ ॐ काम्यफलप्रदाय नमः
५५८ ॐ मुद्रापहारिणे नमः
५५९ ॐ रक्षोघ्नाय नमः
५६० ॐ क्षितिभारहराय नमः
५६१ ॐ अकलाय नमः
५६२ ॐ नरनदंष्ट्रायुधाय नमः
५६३ ॐ विष्णवे नमः
५६४ ॐ भक्ताभयवरप्रदाय नमः
५६५ ॐ दर्पघ्ने नमः
५६६ ॐ दर्पदाय नमः
५६७ ॐ इष्टाय नमः
५६८ ॐ शतमूर्त्तये नमः
५६९ ॐ अमूर्त्तिमते नमः
५७० ॐ महानिधये नमः
५७१ ॐ महाभागाय नमः
५७२ ॐ महागर्भाय नमः
५७३ ॐ महर्द्धिदाय नमः
५७४ ॐ महाकाराय नमः
५७५ ॐ महायोगिने नमः
५७६ ॐ महातेजसे नमः
५७७ ॐ महाद्युतये नमः
५७८ ॐ महाकर्मणे नमः
५७९ ॐ महानादाय नमः
५८० ॐ महामन्त्राय नमः
५८१ ॐ महामतये नमः
५८२ ॐ महाशयाय नमः
५८३ ॐ महोदराय नमः
५८४ ॐ महादेवात्मकाय नमः

५८५ ॐ विभवे नमः
५८६ ॐ रुद्रकर्मणे नमः
५८७ ॐ अकृतकर्मणे नमः
५८८ ॐ रत्ननाभाय नमः
५८९ ॐ कृतागमाय नमः
५९० ॐ अम्भोनिधिलङ्घनाय नमः
५९१ ॐ सिंहाय नमः
५९२ ॐ सत्यधर्माय नमः
५९३ ॐ प्रमोदनाय नमः
५९४ ॐ जितामित्राय नमः
५९५ ॐ जयाय नमः
४९६ ॐ सोमाय नमः
५९७ ॐ विजयाय नमः
५९८ ॐ वायुवाहनाय नमः
५९९ ॐ जीवाय नमः
६०० ॐ धात्रे नमः
६०१ ॐ सहस्रांशवे नमः
६०२ ॐ मुकुन्दाय नमः
६०३ ॐ भूरिदक्षिणाय नमः
६०४ ॐ सिद्धार्थाय नमः
६०५ ॐ सिद्धिदाय नमः
६०६ ॐ सिद्धसङ्कल्पाय नमः
६०७ ॐ सिद्धिहेतुकाय नमः
६०८ ॐ सप्तपातालचरणाय नमः
६०९ ॐ सप्तर्षिगणवन्दिताय नमः
६१० ॐ सप्ताब्धिलंघनाय नमः
६११ ॐ वीराय नमः
६१२ ॐ सप्तद्वीपोरुमण्डलाय नमः
६१३ ॐ सप्तांगराज्यसुखदाय नमः
६१४ ॐ सप्तमातृनिवेशिताय नमः
६१५ ॐ सप्तस्वर्लोकमुकुटाय नमः
६१६ ॐ सप्तहोत्रे नमः
६१७ ॐ स्वराश्रयाय नमः
६१८ ॐ सप्तच्छन्दाय नमः
६१९ ॐ निधये नमः
६२० ॐ सप्तच्छन्दसे नमः
६२१ ॐ सप्तजनाश्रयाय नमः

६२२ ॐ सप्तसामाय नमः
६२३ ॐ उपगीताय नमः
६२४ ॐ सप्तपातालसंश्रयाय नमः
६२५ ॐ बलभीमाय नमः
६२६ ॐ पातालदेवताहन्त्रेनमः
६२७ ॐ शास्त्रे नमः
६२८ ॐ चातुर्यसागराय नमः
६२९ ॐ उद्यद्दक्षिणदोर्दण्डाय नमः
६३० ॐ चपलाङ्गाय नमः
६३१ ॐ प्रतोषकाय नमः
६३२ ॐ वैष्णवाय नमः
६३३ ॐ विश्वरूपात्मने नमः
६३४ ॐ वनारये नमः
६३५ ॐ कल्पभूरुहाय नमः
६३६ ॐ लोहिताङ्गाय नमः
६३७ ॐ गदापाणये नमः
६३८ ॐ धूर्त्ताय नमः
६३९ ॐ सिन्दूरलेपनाय नमः
६४० ॐ कोटिकन्दर्पसौन्दर्याय नमः
६४१ ॐ कपिवृन्दप्रपूजिताय नमः
६४२ ॐ रुद्रावताराय नमः
६४३ ॐ गम्भीराय नमः
६४४ ॐ गम्भीरध्वानसम्भवाय नमः
६४५ ॐ सामगैकशिरोरत्नाय नमः
६४६ ॐ गानविद्याप्रकाशकाय नमः
६४७ ॐ स्वर्णयज्ञोपवीतिने नमः
६४८ ॐ कुमाराय नमः
६४९ ॐ ब्रह्मदीक्षिताय नमः
६५० ॐ अश्रमाय नमः
६५१ ॐ परमोत्साहाय नमः
६५२ ॐ ऐश्वर्यौदार्यसागराय नमः
६५३ ॐ पञ्चाननाय नमः
६५४ ॐ विराडात्मने नमः
६५५ ॐ स्वराजे नमः
६५६ ॐ एकादशाननाय नमः

६५७ ॐ विधिस्तुताय नमः
६५८ ॐ कृपामूर्त्तये नमः
६५९ ॐ रामहृदे नमः
६६० ॐ भक्तवत्सलाय नमः
६६१ ॐ अदाह्याय नमः
६६२ ॐ अच्छेद्याय नमः
६६३ ॐ आधाराय नमः
६६४ ॐ वज्राङ्गाय नमः
६६५ ॐ भुजविक्रमाय नमः
६६६ ॐ श्रीरामहृदयानन्दाय नमः
६६७ ॐ चिरायुषे नमः
६६८ ॐ पूर्णपिण्डजाय नमः
६६९ ॐ ध्यानशीलाय नमः
६७० ॐ प्रशान्तात्मने नमः
६७१ ॐ रामनामामृताशनाय नमः
६७२ ॐ मेघरूपाय नमः
६७३ ॐ मेघवृष्टिनिवारकाय नमः
६७४ ॐ मेघजीवनहेतवे नमः
६७५ ॐ मेघश्यामाय नमः
६७६ ॐ परात्मकाय नमः
६७७ ॐ समीरतनयाय नमः
६७८ ॐ बोध्ने नमः
६७९ ॐ तत्त्वविद्याविशारदाय नमः
६८० ॐ अमोघाय नमः
६८१ ॐ अमोघदृष्टये नमः
६८२ ॐ दिष्टदाय नमः
६८३ ॐ अनिष्टनाशाय नमः
६८४ ॐ अर्थाय नमः
६८५ ॐ अनर्थापहारिणे नमः
६८६ ॐ समर्थाय नमः
६८७ ॐ रामसेवकाय नमः
६८८ ॐ अर्थिने नमः
६८९ ॐ धन्याय नमः
६९० ॐ सुराराातये नमः
६९१ ॐ पुण्डरीकाक्षाय नमः
६९२ ॐ आत्मभुवे नमः
६९३ ॐ सङ्कर्षणाय नमः
६९४ ॐ विशुद्धात्मने नमः
६९५ ॐ विद्याराशये नमः
६९६ ॐ सुरेश्वराय नमः

६९७ ॐ अचलोद्धारकाय नमः
६९८ ॐ नित्याय नमः
६९९ ॐ सेतुकृते नमः
७०० ॐ रामसारथये नमः
७०१ ॐ आनन्दाय नमः
७०२ ॐ परमानन्दाय नमः
७०३ ॐ मत्स्याय नमः
७०४ ॐ कूर्माय नमः
७०५ ॐ निधये नमः
७०६ ॐ शूराय नमः
७०७ ॐ वराहाय नमः
७०८ ॐ नारसिंहाय नमः
७०९ ॐ वामनाय नमः
७१० ॐ जमदग्निजाय नमः
७११ ॐ रामाय नमः
७१२ ॐ कृष्णाय नमः
७१३ ॐ शिवाय नमः
७१४ ॐ बुद्धाय नमः
७१५ ॐ कल्किने नमः
७१६ ॐ रामाश्रयाय नमः
७१७ ॐ हराय नमः
७१८ ॐ नन्दिने नमः
७१९ ॐ शृङ्गिणे नमः
७२० ॐ चण्डिने नमः
७२१ ॐ गणेशाय नमः
७२२ ॐ गणसेविताय नमः
७२३ ॐ कर्माध्यक्षाय नमः
७२४ ॐ सुरारामाय नमः
७२५ ॐ विश्रामाय नमः
७२६ ॐ जगतीपतये नमः
६२७ ॐ जगन्नाथाय नमः
७२८ ॐ कपीशाय नमः
७२९ ॐ सर्वावासाय नमः
७३० ॐ सदाश्रयाय नमः
७३१ ॐ सुग्रीवादिस्तुताय नमः
७३२ ॐ दान्ताय नमः
७३३ ॐ सर्वकर्मणे नमः
६३४ ॐ प्लवङ्गमाय नमः
७३५ ॐ नखादारितरक्षसे नमः
७३६ ॐ नखयुद्धविशारदाय नमः
७३७ ॐ कुशलाय नमः
७३८ ॐ सुधनाय नमः
७३९ ॐ शेषाय नमः

७४० ॐ वासुकये नमः
७४१ ॐ तक्षकाय नमः
७४२ ॐ सुवर्णवर्णाय नमः
७४३ ॐ बलाढ्याय नमः
७४४ ॐ पुरजेत्रे नमः
७४५ ॐ अघनाशनाय नमः
७४६ ॐ कैवल्याय नमः
७४७ ॐ कैवल्यदीपाय नमः
७४८ ॐ गरुडाय नमः
७४९ ॐ पन्नगाय नमः
७५० ॐ गुरवे नमः
७५१ ॐ क्लिक्लिरावहतारातये नमः
७५२ ॐ गर्वाय नमः
७५३ ॐ पर्वतभेदनाय नमः
७५४ ॐ वज्राङ्गाय नमः
७५५ ॐ वज्रवज्राय नमः
७५६ ॐ भक्ताय नमः
७५७ ॐ भक्तवज्रनिवारणाय नमः
७५८ ॐ नखायुधाय नमः
७५९ ॐ मणिग्रीवाय नमः
७६० ॐ ज्वालिने नमः
७६१ ॐ मालिने नमः
७६२ ॐ भास्कराय नमः
७६३ ॐ प्रौढप्रतापाय नमः
७६४ ॐ स्नपनाय नमः
७६५ ॐ भक्ततापनिवारकाय नमः
७६६ ॐ शरणाय नमः
७६७ ॐ जीवाय नमः
७६८ ॐ भोक्त्रे नमः
७६९ ॐ नानाचेष्टाय नमः
७७० ॐ चञ्चलाय नमः
७७१ ॐ स्वस्थाय नमः
७७२ ॐ अस्वास्थ्यघ्ने नमः
७७३ ॐ दुःखशातनाय नमः
७७४ ॐ पवनात्मजाय नमः
७७५ ॐ पावनाय नमः
७७६ ॐ पवनाय नमः
७७७ ॐ कान्ताय नमः
७७८ ॐ भक्ताङ्गाय नमः
७७९ ॐ सहनाय नमः
७८० ॐ बलाय नमः

७८१ ॐ मेघनादरिपवे नमः
७८२ ॐ मेघनादसंहतराक्षसाय नमः
७८३ ॐ क्षराय नमः
७८४ ॐ अक्षराय नमः
७८५ ॐ विनीतात्मने नमः
७८६ ॐ वानरेशाय नमः
७८७ ॐ सताङ्गतये नमः
७८८ ॐ श्रीकण्ठाय नमः
७८९ ॐ शितिकण्ठाय नमः
७९० ॐ सहायाय नमः
७९१ ॐ असहनकाय नमः
७९२ ॐ अस्थूलाय नमः
७९३ ॐ अनणवे नमः
७९४ ॐ भर्गाय नमः
७९५ ॐ देवाय नमः
७९६ ॐ संसृतिनाशाय नमः
७९७ ॐ अध्यात्मविद्याय नमः
७९८ ॐ साराय नमः
७९९ ॐ अध्यात्मकुशलाय नमः
८०० ॐ सुधियै नमः

८०१ ॐ अकल्मषाय नमः
८०२ ॐ सत्यहेतवे नमः
८०३ ॐ सत्यदाय नमः
८०४ ॐ सत्यगोचराय नमः
८०५ ॐ सत्यगर्भाय नमः
८०६ ॐ सत्यरूपाय नमः
८०७ ॐ सत्याय नमः
८०८ ॐ सत्यपराक्रमाय नमः
८०९ ॐ अञ्जनीप्राणलिङ्गाय नमः
८१० ॐ वायुवंशोद्भवाय नमः
८११ ॐ श्रुतये नमः
८१२ ॐ भद्ररूपाय नमः
८१३ ॐ सुरूपाय नमः
८१४ ॐ चित्ररूपधृषे नमः
८१५ ॐ मैनाकवन्दिताय नमः
८१६ ॐ सूक्ष्मदर्शनाय नमः
८१७ ॐ विजयाय नमः
८१८ ॐ जयाय नमः
८१९ ॐ क्रान्तदिङ्मण्डलाय नमः
८२० ॐ रुद्राय नमः

८२१ ॐ प्रकटीकृतविक्रमाय नमः
८२२ ॐ कम्बुकण्ठाय नमः
८२३ ॐ प्रसन्नात्मने नमः
८२४ ॐ ह्रस्वनासाय नमः
८२५ ॐ वृकोदराय नमः
८२६ ॐ लम्बोष्ठाय नमः
८२७ ॐ कुण्डलिने नमः
८२८ ॐ चित्रमालिने नमः
८२९ ॐ योगविदाम्बराय नमः
८३० ॐ विपश्चिते नमः
८३१ ॐ कवये नमः
८३२ ॐ आनन्दविग्रहाय नमः
८३३ ॐ अनन्यशासनाय नमः
८३४ ॐ फल्गुनीसूनवे नमः
८३५ ॐ अव्यग्राय नमः
८३६ ॐ योगात्मने नमः
८३७ ॐ योगतत्पराय नमः
८३८ ॐ योगविदे नमः
८३९ ॐ योगकर्त्रे नमः
८४० ॐ योगयोनये नमः
८४१ ॐ दिगम्बराय नमः
८४२ ॐ अकारादि-हकारान्ताय नमः
८४३ ॐ वर्णनिर्मिताय नमः
८४४ ॐ विग्रहाय नमः
८४५ ॐ उलूखलमुखाय नमः
८४६ ॐ सिद्धाय नमः
८४७ ॐ संस्तुताय नमः
८४८ ॐ प्रथमेश्वराय नमः
८४९ ॐ श्लिष्टजङ्घाय नमः
८५० ॐ श्लिष्टपाणये नमः
८५१ ॐ श्लिष्टजानवे नमः
८५२ ॐ शिखाधराय नमः
८५३ ॐ सुशर्मणे नमः
८५४ ॐ अमितशर्मिणे नमः
८५५ ॐ नारायणपरायणाय नमः
८५६ ॐ जिष्णवे नमः
८५७ ॐ भविष्णवे नमः
८५८ ॐ रोचिष्णवे नमः
८५९ ॐ ग्रसिष्णवे नमः
८६० ॐ स्थास्नवे नमः

८६१ ॐ हरये नमः
८६२ ॐ रुद्रानुकृते नमः
८६३ ॐ वृक्षकम्पनाय नमः
८६४ ॐ भूमिकम्पनाय नमः
८६५ ॐ गुणप्रवाहाय नमः
८६६ ॐ सूत्रात्मने नमः
८६७ ॐ वीतरागाय नमः
८६८ ॐ स्तुतिप्रियाय नमः
८६९ ॐ नागकन्याभयध्वंसिने नमः
८७० ॐ ऋतुपर्णाय नमः
८७१ ॐ कपालभृते नमः
८७२ ॐ अनाकुलाय नमः
८७३ ॐ भगाय नमः
८७४ ॐ अपायाय नमः
८७५ ॐ अनपायाय नमः
८७६ ॐ वेदपारगाय नमः
८७७ ॐ अक्षराय नमः
८७८ ॐ पुरुषाय नमः
८७९ ॐ लोकनाथाय नमः
८८० ॐ ऋक्षप्रभवे नमः
८८१ ॐ दृढाय नमः
८८२ ॐ अष्टाङ्गयोगाय नमः
८८३ ॐ फलभुवे नमः
८८४ ॐ सत्यसन्धाय नमः
८८५ ॐ पुरुष्टुताय नमः
८८६ ॐ श्मशानस्थाननिलयाय नमः
८८७ ॐ प्रेतविद्रावणाय नमः
८८८ ॐ श्रमाय नमः
८८९ ॐ पञ्चाक्षरपराय नमः
८९० ॐ पञ्चमातृकाय नमः
८९१ ॐ रञ्जनाय नमः
८९२ ॐ ध्वजाय नमः
८९३ ॐ योगिने नमः
८९४ ॐ वृन्दवन्द्याय नमः
८९५ ॐ श्रियाय नमः
८९६ ॐ शत्रुघ्नाय नमः
८९७ ॐ अनन्तविक्रमाय नमः
८९८ ॐ ब्रह्मचारिणे नमः
८९९ ॐ इन्द्रियरिपवे नमः
९०० ॐ धृतदण्डाय नमः
९०१ ॐ दशात्मकाय नमः
९०२ ॐ अप्रपञ्चाय नमः

९०३ ॐ सदाकाराय नमः
९०४ ॐ शूरसेनाविदारकाय नमः
९०५ ॐ वृद्धाय नमः
९०६ ॐ प्रमोदाय नमः
९०७ ॐ आनन्दाय नमः
९०८ ॐ सप्तजिह्वपतये नमः
९०९ ॐ धराय नमः
९१० ॐ नवद्वारपुराधाराय नमः
९११ ॐ प्रत्यग्राय नमः
९१२ ॐ सामगायकाय नमः
९१३ ॐ षट्चक्रधाम्ने नमः
९१४ ॐ स्वर्लोकाय नमः
९१५ ॐ भयहृते नमः
९१६ ॐ नामदाय नमः
९१७ ॐ अमदाय नमः
९१८ ॐ सर्ववश्यकराय नमः
९१९ ॐ शक्तये नमः
९२० ॐ अनन्ताय नमः
९२१ ॐ अनन्तमङ्गलाय नमः
९२२ ॐ अष्टमूर्तिधराय नमः
९२३ ॐ नेत्रे नमः
९२४ ॐ विरूपाय नमः
९२५ ॐ स्वरसुन्दराय नमः
९२६ ॐ धूम्रकेतवे नमः
९२७ ॐ महाकेतवे नमः
९२८ ॐ सत्यकेतवे नमः
९२९ ॐ महारथाय नमः
९३० ॐ नन्दीप्रियाय नमः
९३१ ॐ स्वतन्त्राय नमः
९३२ ॐ मेखलिने नमः
९३३ ॐ डमरुप्रियाय नमः
९३४ ॐ लोहाङ्गाय नमः
९३५ ॐ सर्वविदे नमः
९३६ ॐ धन्विने नमः
९३७ ॐ खङ्गदाय नमः
९३८ ॐ शर्वाय नमः
९३९ ॐ ईश्वराय नमः
९४० ॐ फलभुजे नमः
९४१ ॐ फलहस्ताय नमः
९४२ ॐ सर्वकर्मफलप्रदायनमः
९४३ ॐ धर्माध्यक्षाय नमः
९४४ ॐ धर्मफलाय नमः

९४५ ॐ धर्माय नमः
९४६ ॐ धर्मप्रदाय नमः
९४७ ॐ अर्थदाय नमः
९४८ ॐ पञ्चविंशतितत्त्वज्ञाय नमः
९४९ ॐ तारकब्रह्मतत्पतये नमः
९५० ॐ त्रिमार्गवसतिने नमः
९५१ ॐ भीमाय नमः
९५२ ॐ सर्वदुष्टनिवर्हणाय नमः
९५३ ॐ ऊर्जस्वते नमः
९५४ ॐ निष्कलाय नमः
९५५ ॐ शूलिने नमः
९५६ ॐ मालिने नमः
९५७ ॐ गर्जाय नमः
९५८ ॐ निशाचराय नमः
९५९ ॐ रक्ताम्बरधराय नमः
९६० ॐ रक्ताय नमः
९६१ ॐ रक्तमालाविभूषणाय नमः
९६२ ॐ वनमालिने नमः
९६३ ॐ शुभाङ्गाय नमः
९६४ ॐ श्वेताय नमः
९६५ ॐ श्वेताम्बराय नमः
९६६ ॐ यूने नमः
९६७ ॐ जयाय नमः
९६८ ॐ अजेयाय नमः
९६९ ॐ परीवादाय नमः
९७० ॐ सहस्रवदनाय नमः
९७१ ॐ कवये नमः
९७२ ॐ शाकिनी-डाकिनी-यक्ष-रक्षोभूतप्रभञ्जकाय नमः
९७३ ॐ सद्योजाताय नमः
९७४ ॐ कायगतये नमः
९७५ ॐ ज्ञानमूर्त्तये नमः
९७६ ॐ यशस्कराय नमः
९७७ ॐ शम्भुतेजसे नमः
९७८ ॐ सार्वभौमाय नमः
९७९ ॐ विष्णुभक्ताय नमः
९८० ॐ प्लवङ्गमाय नमः
९८१ ॐ चतुर्नवतिमन्त्रज्ञाय नमः
९८२ ॐ पौलस्त्यबलदर्पघ्ने नमः

९८३ ॐ सर्वलक्ष्मीप्रदाय नमः
९८४ ॐ श्रीमते नमः
९८५ ॐ अङ्गदप्रियाय नमः
९८६ ॐ इतिनुदे नमः
९८७ ॐ स्मृतये नमः
९८८ ॐ बीजाय नमः
९८९ ॐ सुरेशाय नमः
९९० ॐ संसारभयनाशनाय नमः
९९१ ॐ उत्तमाय नमः
९९२ ॐ श्रीपरिवाराय नमः
९९३ ॐ श्रीभुवे नमः
९९४ ॐ उग्राय नमः
९९५ ॐ कामदुघे नमः
९९६ ॐ तारकाय नमः
९९७ ॐ भगवते नमः
९९८ ॐ त्रात्रे नमः
९९९ ॐ स्वस्तिदात्रे नमः
१००० ॐ सुमङ्गलाय नमः

अनेन सहस्रनाम्नाऽमुकद्रव्यसमर्पणेन श्रीहनुमद्देवता प्रीयताम् ।

इति आचार्यपण्डितश्रीशिवदत्तमिश्रशास्त्रिरचिते हनुमद्-
रहस्ये हनुमत्सहस्रनामावली समाप्ता ।

—:*:—

लांगूलास्त्रशत्रुञ्जयहनुमत्स्तोत्रम्

ॐ महनुमन्तं महावीरं वायुतुल्यपराक्रमम् ।

मम कार्यार्थमागच्छ प्रणमामि मुहुर्मुहुः ॥१॥

विनियोगः—ॐ अस्य श्रीहनुमच्छत्रुञ्जयस्तोत्रमालामन्त्रस्य श्रीरामचन्द्र ऋषिः, नानाच्छन्दांसि, श्रीमन्महावीरो हनुमान् देवता, मारुतात्मज इति ह्सौं बीजम्, अञ्जनीसूनुरिति ह्फ्रें शक्तिः, ॐ हाहाहा इति कीलकम्, श्रीरामभक्त इति ह्लांप्राणः, श्रीराम-लक्ष्मणानन्दकर इति ह्रांह्रींह्रूं जीवः, ममाऽरातिपराजयनिमित्त-शत्रुञ्जयस्तोत्र-मालामन्त्रजपे विनियोगः ।

करन्यासः—ॐ ऐं श्रीं ह्रां ह्रीं ह्रूं स्फ्रें ख्फ्रें ह्स्त्रौं ह्स्ख्फ्रें ह्सौं नमो हनुमते अंगुष्ठाभ्यां नमः । ॐ ऐं श्रीं ह्रां ह्रीं ह्रूं स्फ्रें ख्फ्रें ह्स्त्रौं ह्स्ख्फ्रें ह्सौं रामदूताय तर्जनीभ्यां नमः । ॐ ऐं श्रीं ह्रां ह्रीं ह्रूं स्फ्रें ख्फ्रें ह्स्त्रौं ह्स्ख्फ्रें ह्सौं लक्ष्मणप्राणदात्रे मध्य-

---

वायु के समान पराक्रमी, महाबली हनुमान् जी को मैं बार-बार प्रणाम करता हूँ, और प्रार्थना करता हूँ कि मेरे कार्य के लिए आप आइए ॥ १ ॥

विनियोग—दाहिने हाथ में जल लेकर, 'ॐ अस्य श्री हनुमच्छत्रुञ्जयस्तोत्र-मालामन्त्रस्य' से आरम्भ कर, 'मालामन्त्रजपे विनियोगः' तक मन्त्र पढ़कर जल छोड़ना चाहिए ।

करन्यास—'ॐ ऐं श्री ह्रां ह्रीं ह्रूं……अंगुष्ठाभ्यां नमः' मन्त्र पढ़कर दोनों हाथ की तर्जनी अंगुलियों से दोनों अँगूठों को स्पर्श करे । ॐ ऐं श्रीं ह्रां ह्रीं ह्रूं……तर्जनीभ्यां नमः' से दोनों हाथ के

माभ्यां नमः । ॐ ऐं श्रीं ह्रां ह्रीं ह्रूं स्फ्रें ख्फ्रें ह्स्रौं ह्स्ख्फ्रें ह्सौं अञ्जनीसूनवे अनामिकाभ्यां नमः। ॐ ऐं श्रीं ह्रां ह्रीं ह्रूं स्फ्रें ख्फ्रें ह्स्रौं ह्स्ख्फ्रें ह्सौं सीताशोकविनाशनाय कनिष्ठिकाभ्यां नमः । ॐ ऐं श्रीं ह्रां ह्रीं ह्रूं स्फ्रें ख्फ्रें ह्स्रौं ह्स्ख्फ्रें ह्सौं लङ्काप्रासादभञ्जनाय करतलकरपृष्ठाभ्यां नमः। इति करन्यासः।

हृदयादिन्यासः—ॐ ऐं श्रीं ह्रां ह्रीं ह्रूं स्फ्रें ख्फ्रें ह्सौं ह्स्ख्फ्रें ह्सौं नमो हनुमते हृदयाय नमः । ॐ ऐं श्रीं ह्रां ह्रीं ह्रूं स्फ्रें ख्फ्रें ह्स्रौं ह्स्ख्फ्रें ह्सौं रामदूताय शिरसे स्वाहा । ॐ ऐं श्रीं ह्रां ह्रीं ह्रूं स्फ्रें ख्फ्रें ह्स्रौं ह्स्ख्फ्रें ह्सौं लक्ष्मणप्राणदात्रे शिखायै वषट् । ॐ ऐं श्रीं ह्रां ह्रीं ह्रूं स्फ्रें ख्फ्रें ह्स्ख्फ्रें ह्स्रौं अञ्जनीसूनवे कवचाय हुम्। ॐ ऐं श्रीं ह्रां ह्रीं ह्रूं स्फ्रें ख्फ्रें ह्स्रौं

अँगूठे से दोनों तर्जनी अँगुलियों का स्पर्श करे। 'ॐ ऐं श्रीं ह्रां ह्रीं ह्रूं ······ मध्यमाभ्यां नमः' मन्त्र से दोनों हाथ के अँगूठों से मध्यमा अँगुलियों को छुए। 'ॐ ऐं श्रीं ह्रां ह्रीं ह्रूं ······ अनामिकाभ्यां नमः' इस मन्त्र से दोनों हाथ की अनामिका अँगुलियों का स्पर्श करे। 'ॐ ऐं श्रीं ह्रां ह्रीं ह्रूं ······ कनिष्ठिकाभ्यां नमः' पढ़कर दोनों हाथ के कानी अँगुलियों को छुए। 'ॐ ऐं श्रीं ह्रां ह्रीं ह्रूं ······ करतल-करपृष्ठाभ्यां नमः' मन्त्र पढ़कर दोनों हथेलियों और उनके पृष्ठ-भागों का स्पर्श करे।

हृदयादिन्यास—'ॐ ऐं श्रीं ह्रां ह्रीं ह्रूं ······ हृदयाय नमः' इस मन्त्र से दाहिने हाथ की पाँचों अँगुलियों से हृदय का स्पर्श करे। 'ॐ ऐं श्रीं ह्रां ह्रीं ह्रूं ······ शिरसे स्वाहा' से शिर का स्पर्श करे। 'ॐ ऐं श्रीं ··· शिखायै वषट्' से शिखा का स्पर्श, 'ॐ ऐं श्रीं ह्रां ह्रीं ह्रूं ··· कवचाय हुम्' से दाहिने हाथ से बाँयें कन्धे और बाँयें हाथ से

ह्स्ख्फ्रें ह्सौं सीताशोकविनाशनाय नेत्रत्रयाय वौषट्। ॐ ऐं श्रीं ह्रां ह्रीं ह्रूं स्फ्रें ख्फ्रें ह्स्रौं ह्स्ख्फ्रें ह्सौं लङ्काप्रासाद-भञ्जनाय अस्त्राय फट्। इति हृदयादिन्यासः।

ध्यानम्——ध्यायेद् बाल-दिवाकर-द्युतिनिभं देवारि-दर्पापहं
देवेन्द्र-प्रमुखैः प्रशस्तयशसं देदीप्यमानं रुचा।
सुग्रीवादि-समस्त-वानरयुतं सुव्यक्त-तत्त्वप्रियं
संरक्ता-ऽरुण-लोचनं पवनजं पीताम्बरालंकृतम् ॥१॥
मनोजवं मारुत-तुल्य-वेगं जितेन्द्रियं बुद्धिमतां वरिष्ठम्।
वातात्मजं वानरयूथमुख्यं श्रीरामदूतं शरणं प्रपद्ये ॥२॥
वज्राङ्गं पिङ्गकेशाढ्यं स्वर्ण-कुण्डल-मण्डितम्।
नियुद्धमुपसङ्कल्प-पारावार-पराक्रमम् ॥३॥
गदायुक्तं वामहस्तं पाशहस्तं कमण्डलुम्।
उद्यद्-दक्षिण-दोर्दण्डं हनुमन्तं विचिन्तयेत् ॥४॥

इति ध्यात्वा, 'अरे मल्ल चटख' इत्युच्चारणेऽथवा 'तोडरमल्ल चटख' इत्युच्चारणे [1]कपिमुद्रां प्रदर्शयेत्।

दाहिने कन्धे का स्पर्श करना चाहिए। 'ॐ ऐं श्रीं ह्रां ह्रीं ह्रूं ... नेत्र-त्रयाय वौषट्' से दाहिने हाथ की अँगुलियों के अग्रभाग से दोनों नेत्रों का स्पर्श करे और 'ॐ ऐं श्रीं ह्रां ह्रीं ह्रूं ... अस्त्राय फट्' इस मन्त्र से दोनों हाथ के अँगूठों को चिटका देना चाहिए।

ध्यान—'ध्यायेद् बाल-दिवाकर०' से लेकर 'हनुमन्तं विचिन्तयेत्' तक ध्यान के चार श्लोक पढ़कर श्री हनुमान्जी का ध्यान करे।

इस प्रकार हनुमान्जी का ध्यान कर, 'अरे मल्ल चटख' ऐसा

---

१. वानरी (कपि) मुद्रा—

वानरी चाऽस्ति मुद्रेयं तां शृणुष्व वदाम्यहम्।
करौ सम्पुटितौ कृत्वा समश्लिष्टाङ्गुली स्फुटा ॥

मालामन्त्रः—ॐ ऐं श्रीं ह्रां ह्रीं ह्रूं स्फ्रें ख्फ्रें ह्स्ख्फ्रें ह्सौं नमो हनुमते त्रैलोक्याक्रमण-पराक्रम-श्रीरामभक्त ! मम परस्य च सर्वशत्रून् चतुर्वर्णसम्भवान् पुं-स्त्री-नपुंसकान् भूत-भविष्यद्-वर्तमानान् नानादूरस्थ-समीपस्थान् नाना-नामधेयान् नानासङ्करजातिजान् कलत्र-पुत्र-मित्र-भृत्य-बन्धु-सुहृत्-समेतान् प्रभुशक्ति-सहितान् धन-धान्यादि-सम्पत्तियुतान् राज्ञो राजपुत्र-सेवकान् मन्त्रि-सचिव-सखीन् आत्यन्तिकक्षणेन त्वरया एत-द्दिनावधि नानोपायैर्मारय मारय शस्त्रैश्छेदय छेदय अग्निना ज्वालय ज्वालय दाहय दाहय अक्षयकुमारवत् पादतलाक्रम-णेनाऽनेन शिलातले आत्रोटय आत्रोटय घातय घातय वध वध भूतसङ्घैः सह भक्षय भक्षय क्रुद्धचेतसा नखैर्विदारय विदारय देशादस्मादुच्चाटय उच्चाटय पिशाचवत् भ्रंशय भ्रंशय भ्रामय भ्रामय भयातुरान् विसंज्ञान् सद्यः कुरु कुरु भस्मीभूतान् उद्धूलय

पढ़कर अथवा 'तोडरमल्ल चटख' इसका उच्चारण कर श्रीहनुमान् जी को कपिमुद्रा दिखावे।

मालामन्त्र—'ॐ ऐं श्रीं ह्रां ह्रीं ह्रूं॰' से लेकर 'उच्चाटय

तर्जन्यश्चाऽङ्गुलीमूले कृत्वा द्व्यङ्गुष्ठयोरपि।
अङ्गुल्यः पाणयो; सर्वा अन्तर्गर्भस्थिराः कुरु॥
हृदयोपरि स्थितास्तास्तु मुकुलाकृतिसंयुताः।
स्वामिपादे स्थिरा दृष्टिर्मुद्रा स्याच्च स्थिराऽपि तु॥
(ज्ञेयेयं वानरी मुद्रा चैका मन्त्रपथे ध्रुवा।)

—ह॰ पं॰, श्लोक १४२-१४५, पृष्ठ १४८

उद्धूलय भक्तजनवत्सल ! सीताशोकापहारक ! सर्वत्र माम् एनं च रक्ष रक्ष हाहाहा हुंहुंहुं घेघेघे हुंफट् स्वाहा ॥ १ ॥

ॐ नमो भगवते हनुमते महाबलपराक्रमाय महाविपत्ति-निवारकाय भक्तजनमनःकामना-कल्पद्रुमाय दुष्टजन-मनोरथ-स्तम्भनाय प्रभञ्जनप्राणप्रियाय स्वाहा ॐ ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः मम शत्रून् शूलेन छेदय छेदय अग्निना ज्वालय ज्वालय दाहय दाहय उच्चाटय उच्चाटय हुंफट् स्वाहा ॥ २ ॥ इति मालामन्त्रः ।

शत्रुञ्जयहनुमत्स्तोत्रम्

श्रीमन्तं हनुमन्त-मार्तरिपुभिद्-भूभृत्तरुभ्राजितं
चाल्पद्-बालधि-बन्धवैरिनिचयं चामीकराद्रिप्रभम् ।
अष्टौ रक्त-पिशङ्ग-नेत्र-नलिनं भ्रूभङ्गमङ्ग-स्फुरत्
प्रोद्यच्चण्ड-मयूख-मण्डल-मुखं दुःखापहं दुःखिनाम् ॥ १ ॥

कौपीनं कटिसूत्र-मौञ्ज्यजिनयुग्देहं विदेहात्मजा
प्राणाधीश-पदारविन्दनिरतं स्वान्तं कृतान्तं द्विषाम् ।
ध्यात्वैवं समराङ्गणस्थितमथानीय स्व-हृत्पङ्कजे
सम्पूज्या-ऽखिल-पूजनोक्त-विधिना सम्प्रार्थयेत् प्रार्थितम् ॥ २ ॥

उच्चाटय हुं फट् स्वाहा' तक माला मन्त्र है ।

पश्चात् एकाग्र चित्त होकर 'श्रीमन्तं हनुमन्तमार्तरिपुभिद्०' [श्लोक १] से लेकर 'प्रमोदते मारुतजप्रसादात्' [श्लोक २५] तक शत्रुंजयस्तोत्र का पाठ करना चाहिए ।

हनुमन्नञ्जनीसूनो ! महाबलपराक्रम ! ।
लोलल्लाङ्गूलपातेन ममाऽरातीन् निपातय ॥ ३ ॥
मर्कटाधिप ! मार्तण्ड-मण्डल-ग्रास-कारक ! ।
लोलल्लाङ्गूलपातेन ममाऽरातीन् निपातय ॥ ४ ॥
अक्षयन्नपि पिङ्गाक्ष ! क्षितिशोकक्षयङ्कर ! ।
लोलल्लाङ्गूलपातेन ममाऽरातीन् निपातय ॥ ५ ॥
रुद्रावतार ! संसार-दुःख-भारापहारक ! ।
लोलल्लाङ्गूलपातेन ममाऽरातीन् निपातय ॥ ६ ॥
श्रीराम-चरणाम्भोज-मधुपायत-मानस ! ।
लोलल्लाङ्गूलपातेन ममाऽरातीन् निपातय ॥ ७ ॥
बालि-कोदरद-क्लान्त-सुग्रीवोन्मोचनप्रभो ! ।
लोलल्लाङ्गूलपातेन ममाऽरातीन् निपातय ॥ ८ ॥
सीता-विरह-वारीश-मग्न-सीतेशतारक ! ।
लोलल्लाङ्गूलपातेन ममाऽरातीन् निपातय ॥ ९ ॥
रक्षोराज-प्रतापाग्नि-दह्यमान-जगद्वन ! ।
लोलल्लाङ्गूलपातेन ममाऽरातीन् निपातय ॥१०॥
ग्रस्ताऽशेष-जगत्-स्वास्थ्य-राक्षसाम्भोधिमन्दर ! ।
लोलल्लाङ्गूलपातेन ममाऽरातीन् निपातय ॥११॥
पुच्छ-गुच्छ-स्फुरद्-भूमि-जगद्-दग्धारिपत्तन ! ।
लोलल्लाङ्गूलपातेन ममाऽरातीन् निपातय ॥१२॥
जगन्मनो-दुरुल्लंघ्य-पारावार-विलङ्घन ! ।
लोलल्लाङ्गूलपातेन ममाऽरातीन् निपातय ॥१३॥

स्मृतमात्र-समस्तेष्ट-पूरक ! प्रणतप्रिय ! ।
लोलल्लाङ्गूलपातेन ममाऽरातीन् निपातय ॥१४॥
रात्रिञ्चर-चमूराशि-कर्तनैक-विकर्तन ! ।
लोलल्लाङ्गूलपातेन ममाऽरातीन् निपातय ॥१५॥
जानकी-जानकीज्यानि-प्रेमपात्र ! परन्तप ! ।
लोलल्लाङ्गूलपातेन ममाऽरातीन् निपातय ॥१६॥
भीमादिक-महावीर-वीरावेशावतारक ! ।
लोलल्लाङ्गूलपातेन ममाऽरातीन् निपातय ॥१७॥
वैदेही-विरहक्लान्त-रामरोषैक-विग्रह ! ।
लोलल्लाङ्गूलपातेन ममाऽरातीन् निपातय ॥१८॥
वज्राङ्ग-नख-दंष्ट्रेश ! वज्रिवज्रावगुण्ठन ! ।
लोलल्लाङ्गूलपातेन ममाऽरातीन् निपातय ॥१९॥
अखर्व-गर्व-गन्धर्व-पर्वतोद्भेदन-स्वर ! ।
लोलल्लाङ्गूलपातेन ममाऽरातीन् निपातय ॥२०॥
लक्ष्मणप्राण-सन्त्राणत्राता तीक्ष्णकरान्वय ! ।
लोलल्लाङ्गूलपातेन ममाऽरातीन् निपातय ॥२१॥
रामाधिविप्रयोगार्त ! भरताद्यार्तिनाशन ! ।
लोलल्लाङ्गूलपातेन ममाऽरातीन् निपातय ॥२२॥
द्रोणाचल-समुत्क्षेप-समुत्क्षिप्तारि-वैभव ! ।
लोलल्लाङ्गूलपातेन ममाऽरातीन् निपातय ॥२३॥
सीताशीर्वाद-सम्पन्न ! समस्तावयवाक्षत ! ।
लोलल्लाङ्गूलपातेन ममाऽरातीन् निपातय ॥२४॥

इत्येवमश्वत्थ-तलोपविष्टः शत्रुञ्जयं नाम पठेत् स्वयं यः ।
स शीघ्रमेवास्त-समस्तशत्रुः प्रमोदते मारुतज-प्रसादात् ।२५।

इति आचार्य-पण्डितश्रीशिवदत्तमिश्रशास्त्रिकृत-'हनुमद्-रहस्ये 'शिवदत्ती' हिन्दी-व्याख्यासहितं लाङ्गूलास्त्र-शत्रुञ्जयहनुमत्स्तोत्रं सम्पूर्णम् ।

*

हनुमदष्टकस्तोत्रम्

श्रीरघुराज-पदाब्ज-निकेतन ! पङ्कजलोचन ! मङ्गलराशे !
चण्डमहाभुज-दण्डसुरारि-विखण्डनपण्डित ! पाहि दयालो ।
पातकिनं च समुद्धर मां महतां हि सतामपि मानमुदारं
त्वां भजतो मम देहि दयाघन ! हे हनुमत् ! स्वपदाम्बुजदास्यम् ।१।

संसृतिताप-महानलदग्ध-तनूरुहमर्म-तनोरतिवेलं
पुत्र-धन-स्वजनात्म-गृहादिषु सक्तमतेरतिकिल्विषमूर्तेः ।
केनचिदप्यमलेन पुराकृत-पुण्य-सुपुञ्जलवेन विभो वै
त्वां भजतो मम देहि दयाघन ! हे हनुमत् ! स्वपदाम्बुजदास्यम् ।२।

संसृतिकूप-मनल्पमघोरनिदाघ-निदानमजस्रमशेषं
प्राप्य सुदुःख-सहस्रभुजङ्ग-विषैक-समाकुल-सर्वतनोर्मे !
घोरमहाकृपणापदमेव गतस्य हरे पतितस्य भवाब्धौ
त्वां भजतो मम देहि दयाघन ! हे हनुमत् ! स्वपदाम्बुजदास्यम् ।३।

संसृतिसिन्धु-विशाल-कराल-महाबलकाल-झषग्रसनार्तं
व्यग्र-समग्रधियं कृपणं च महामद-नक्र-सुचक्र-हतासुम् ।
काल-महारसनोर्मि-निपीडितमुद्धर दीनमनन्यगतिं मां
त्वां भजतो मम देहि दयाघन! हे हनुमत्! स्वपदाम्बुजदास्यम् ।४।

संसृतिघोर-महागहनेचरतो मणिरञ्जित-पुण्य-सुमूर्तेः
मन्मथभीकर-घोरमहोग्र-मृगप्रवरार्दित-गात्रसुसन्धेः ।
मत्सरताप-विशेषनिपीडित बाह्यमतेश्च कथञ्चिदमेयं
त्वां भजतो मम देहि दयाघन! हे हनुमत्! स्वपदाम्बुजदास्यम् ।५।

संसृतिवृक्ष-मनेकशताघ-निदानमनन्त-विकर्मसुशाखं
दुःखफलं करणादिपलाशमनङ्ग-सुपुष्पमचिन्त्य-सुमूलम् ।
त ह्यधिरुह्य हरे पतितं शरणागतमेव विमोचय नूढं
त्वां भजतो मम देहि दयाघन! हे हनुमत्! स्वपदाम्बुजदास्यम् ।६।

संसृतिपन्नग-वक्रभयङ्कर-दंष्ट्र-महाविषदग्ध-शरीरं
प्राणविनिर्गम-भीतिसमाकुल-मन्धमनाथमतीव विषण्णम् ।
मोहमहाकुहरे पतितं दययोद्धर मामजितेन्द्रियकामं
त्वां भजतो मम देहि दयाघन! हे हनुमत्! स्वपदाम्बुजदास्यम् ।७।

इन्द्रियनामक-चौरगणैर्हृत-तत्त्वविवेक-महाधनराशिं
संसृतिजाल-निपातितमेव महाबलिभिश्चविखण्डितकायम् ।
त्वत्पदपद्म-मनुत्तममाश्रितमाशु कपीश्वर! पाहि कृपालो!
त्वां भजतो मम देहि दयाघन! हे हनुमत्! स्वपदाम्बुजदास्यम् ।८।

ब्रह्म-मरुद्गण-रुद्र-महेन्द्र-किरीट-सुकोटि-लसत्पदपीठं
दाशरथिं जपति क्षितिमण्डल एष निधाय सदैव हृदब्जे ।

तस्य हनुमत एव शिवङ्करमष्टकमेतदनिष्टहरं वै
यः सततं हि पठेत् स नरो लभतेऽच्युत-रामपदाब्ज-निवासम् ।९।

इति पण्डितश्रीशिवदत्तमिश्रशास्त्रिविरचिते हनुमद्-
रहस्ये हनुमदष्टकं सम्पूर्णम् ।

*

हनुमत्पञ्चरत्नस्तोत्रम्

शंशंशंसिद्धिनाथं प्रणमति चरणं वायुपुत्रं च रौद्रं
वंवंवंविश्वरूपं हहहहहसितं गर्जितं मेघछत्रम् ।
तंतंत्रैलोक्यनाथं तपति दिनरं तं त्रिनेत्रस्वरूपं
कंकंकन्दर्पवश्यं कमलमनहरं शाकिनीकालरूपम् ॥१॥

रंरंरंरामदूतं रणगजदमितं रावणच्छेददक्षं
बंबंबंबालरूपं नतगिरिचरणं कम्पितं सूर्यबिम्बम् ।
मंमंमंमन्त्रसिद्धि कपिकुलतिलकं मर्दनं शाकिनीनां
हुंहुंहुंकारबीजं हनति हनुमतं हन्यते शत्रुसैन्यम् ॥२॥

दंदंदंदीर्घरूपं धरकरशिखरं पातितं मेघनादं
ॐॐउच्चाटितं वै सकलभुवतलं योगिनीवृन्दरूपम् ।
क्षंक्षंक्षंक्षिप्रवेगं क्रमति च जलधिं ज्वालितं रक्षदुर्गं
क्षेंक्षेंक्षेंक्षेमतत्त्वं दनुरुहकुलकं मुच्यते बिम्बकारम् ॥३॥

कंकंकंकालदुष्टं जलनिधितरणं राक्षसानां विनाशे
दक्षं श्रेष्ठं कवीनां त्रिभुवनचरतां प्राणिनां प्राणरूपम् ।
ह्वांह्वांह्वांह्वासतत्त्वं त्रिभुवनरचितं दैवतं सर्वभूते
देवानां च त्रयाणां फणिभुवनधरं व्यापकं वायुरूपम् ॥४॥

त्वंत्वंत्वंवेदतत्त्वं बहुऋचयजुषां सामचाऽथर्वरूपं
कंकंकंकन्दने त्वं ननु कमलतले राक्षसान् रौद्ररूपान् ।
खंखंखंषड्गहस्तं झटिति भुवतले त्रोटितं नागपाशं
ॐॐॐकाररूपं त्रिभुवनपठितं वेदमन्त्राधिमन्त्रम् ॥५॥
संग्रामे शत्रुमध्ये जलनिधितरणे व्याघ्रसिंहे च सर्पे
राजद्वारे च मार्गे गिरिगुहविवरे चोषरे कन्दरे वा ।
भूत-प्रेतादि-युक्ते ग्रहगणविषये शाकिनी-डाकिनीनां
देशे विस्फोटकानां ज्वर-वमन-शिरःपीडने नाशकस्त्वम् ॥६॥

इति पण्डितश्रीशिवदत्तमिश्रशास्त्रिविरचिते हनुमद्-
रहस्ये हनुमत्पञ्चरत्नस्तोत्रं सम्पूर्णम् ।

*

संकष्टमोचनस्तोत्रम्

सिन्दूर-पूर-रुचिरो बलवीर्यसिन्धु-
बुंद्धिप्रभावनिधिरद्भुत-वैभवश्रीः ।
दीनार्तिदाव-दहनो वरदो वरेण्यः
सङ्कष्टमोचनविभुस्तनुतां शुभं नः ॥ १ ॥
सोत्साह-लङ्घित–महार्णव-पौरुषश्री-
लंङ्कापुरी–प्रदहन–प्रथितप्रभावः ।
घोराहव – प्रमथितारि – चमूप्रवीरः
प्राभञ्जनिर्जयति मर्कटसार्वभौमः ॥ २ ॥

द्रोणाचलानयन - वर्णित - भव्यभूतिः
श्रीराम-लक्ष्मण-सहायक-चक्रवर्ती ।
काशीस्थ-दक्षिण-विराजित-सौधमल्लः
श्रीमारुतिर्विजयते भगवान् महेशः ॥ ३ ॥

नूनं स्मृतोऽपि दयते भजतां कपीन्द्रः
सम्पूजितो दिशति वाञ्छित-सिद्धिवृद्धिम् ।
सम्मोदकप्रिय उपैति परं प्रहर्षं
रामायण-श्रवणतः पठतां शरण्यः ॥ ४ ॥

श्रीभारत - प्रवर-युद्धरथोद्धत - श्रीः
पार्थैक - केतन- कराल - विशालमूर्त्तिः ।
उच्चैर्घनाघन-घटा-विकटाऽट्टहासः
श्रीकृष्णपक्षभरणः शरणं ममाऽस्तु ॥ ५ ॥

जङ्घालजङ्घ उपमातिविदूरवेगो
मुष्टि - प्रहार - परिमूर्च्छित-राक्षसेन्द्रः ।
श्रीरामकीर्तित - पराक्रमणोद्भवश्रीः
प्राकम्पनिर्विभुरुदञ्चतु भूतये नः ॥ ६ ॥

सीतार्त्ति-दारणपटुः प्रबलः प्रतापी
श्रीराघवेन्द्र - परिरम्भवर - प्रसादः ।
वर्णीश्वरः सविधि-शिक्षित-कालनेमिः
पञ्चाननोऽपनयतां विपदोऽधिदेशम् ॥ ७ ॥

उद्यद्-भानुसहस्र-सन्निभतनुः पीताम्बरालङ्कृतः
प्रोज्ज्वालानल-दीप्यमान-नयनो निष्पिष्ट-रक्षोगणः ।

संवर्तोद्यत-वारिदोद्धत-रवः प्रोच्चैर्गदाविभ्रमः
श्रीमान् मारुतनन्दनः प्रतिदिनं ध्येयो विपद्-भञ्जनः ॥ ८ ॥

रक्षःपिशाचभय - नाशनमामयाधि-
प्रोच्चैर्ज्वरापहरणं दमनं रिपूणाम् ।
सम्पत्ति - पुत्रकरणं विजयप्रदानं
सङ्कष्टमोचनविभोः स्तवनं नराणाम् ॥ ९ ॥

दारिद्र्य-दुःख-दहनं विजयं विवादे
कल्याण-साधनममङ्गलवारणं च ।
दाम्पत्य - दीर्घसुख - सर्वमनोरथाप्ति
श्रीमारुतेः स्तवशतावृतिरातनोति ॥१०॥

स्तोत्रं य एतदनुवासरमस्तकामः
श्रीमारुतिं समनुचिन्त्य पठेत् सुधीरः ।
तस्मै प्रसादसुमुखो वरवानरेन्द्रः
साक्षात्कृतो भवति शाश्वतिकः सहायः ॥११॥

सङ्कष्टमोचनस्तोत्रं शङ्कराचार्यभिक्षुणा ।
महेश्वरेण रचितं मारुतेश्चरणेऽर्पितम् ॥१२॥

इति हनुमद्-रहस्ये काशीपीठाधीश्वर-जगद्गुरु-शङ्कराचार्य-स्वामि-श्रीमहेश्वरानन्दसरस्वती-विरचितं सङ्कष्टमोचनस्तोत्रं समाप्तम् ।

*

हनुमदुपनिषद्

आथर्वणवेदे त्रिपञ्चाशत्तमम्—

ॐ सनकादियोगीन्द्रा अन्ये च ऋषयस्तथा ।
प्रह्लादाद्या विष्णुभक्ता हनुमन्तमिदं जगुः ॥ १ ॥
वायुपुत्र ! महाबाहो ! किं तत्त्वं ब्रह्मवादिनाम् ।
पुराणेष्वष्टादशसु स्मृतिष्वष्टादशस्वपि ॥ २ ॥
चतुर्वेदेषु शास्त्रेषु विद्यास्वाध्यात्मिकेषु च ।
सर्वेषु विबुधाद्येषु विघ्नसूर्येषु शक्तिषु ॥ ३ ॥
एतेषु मध्ये किं तत्त्वं कथयस्व महाबल ! ।

हनुमानुवाच

भो भो योगीन्द्रा ऋषयो विष्णुभक्तास्तथैव च ॥ ४ ॥
शृणुध्वं मामकीं वाचं भव बन्धविनाशिनीम् ।
एतेषु चैव सर्वेषु तत्त्वं च ब्रह्मतारकम् ॥ ५ ॥
राम एव परं ब्रह्म राम एव परं तपः ।
राम एव परं तत्त्वं श्रीरामो ब्रह्मतारकम् ॥ ६ ॥

वायुपुत्रेणोक्ता योगीन्द्रा ऋषयो विष्णुभक्ताः पुनः पप्रच्छुः-हनुमन्तं रामस्याऽङ्गानि तानि नो ब्रूहीति हनुमान् स होवाच । वायुपुत्रो विघ्न-शक्ति-दुर्गाक्षेत्रपाल-सूर्य-रुद्र-नारायण-नारसिंह-वासुदेव-वाराहमन्त्रानन्यान् कांश्चित् सर्वान् मन्त्रान् श्रीसीता-लक्ष्मण-हनुमद्-भरत-शत्रुघ्न-विभीषण-सुग्रीवा-ऽङ्गद-जाम्बवत्प्रण-वमन्त्रारामस्याऽङ्गाभिजनितास्तान् विना रामो विघ्नकरो भवति ।

पुनर्वायुपुत्रेणोक्तास्ते पुनर्हनुमन्तं पप्रच्छुराञ्जनेय! महाबल-विप्राणां गृहस्थानां प्रणवाधिकारः कथं स्यादिति पुनरुवाच हनुमान्। अयोध्यानगरे रम्ये समासीनो रामो मया पृष्टः सीतापते! योगीन्द्रमानहंस! विप्र-गृहस्थानां प्रणवाधिकारः कथं स्यादिति सहोवाच रामो येषां मे षडक्षराधिकारा वर्तन्ते तेषां प्रणवाधिकारः स्यान्नाऽन्येषां प्रणवस्य केवलमकारोकार-मकारार्द्ध-मात्रासहितस्य साद्यन्तं यो राममन्त्रं जपति तस्याऽभयकरोऽहं स्याम् तस्मात्प्रणवस्याकारस्योकारस्य च मकारस्य चाऽर्द्ध-मात्रासहितस्य ऋषिछन्दोदेवतातत्त्ववर्णावस्थान-स्वरवेदाग्नीनु-च्चार्य न्यासं कृत्वा प्रणवं मन्मन्त्राद् द्विगुणं जप्त्वा पश्चाद् राममन्त्रमाद्यतः प्रणवं यो जपेत् स रामो भवेदिति रामेणोक्तं तस्माद् रामाङ्गे प्रणवः कथित इति वायुपुत्रेणोक्ताः पुनर्हनुमन्तं पप्रच्छुः। रामभक्तविभीषणकृतां रामपरिचर्यां श्रोतुमिच्छामः। सहोवाच हनुमान् विभीषणोक्तरामचर्यायां सप्तसहस्राणि संस्कृत-वाक्यानि सप्तसहस्राणि गद्यानि पञ्चशतान्यार्या अष्टौ सहस्राणि श्लोकाश्चतुर्विंशतिसहस्राणि पद्यानि दशसहस्राणि दण्डका इत्ये-वमनुक्रमं ज्ञात्वा कृतकृत्यो भवेदिति।

इति हनुमद्-रहस्ये हनुमदुपनिषत्समाप्ता।

हनुमत्कल्पम्

देव्युवाच

शैवानि गाणपत्यानि शाक्तानि वैष्णवानि च।
साधनानि च सौराणि चाऽन्यानि यानि कानि च? ॥१॥

एतानि देवदेवेश ! त्वदुक्तानि श्रुतानि च ।
किञ्चिदन्यच्च देवानां साधनं यदि कथ्यताम् ? ॥ २ ॥

शङ्कर उवाच

शृणु देवि ! प्रवक्ष्यामि सावधानाऽवधारय ।
हनुमत्साधनं पुण्यं महापातकनाशनम् ॥ ३ ॥
एतद् गुह्यतमं लोके शीघ्रं सिद्धिकरं परम् ।
जयो यस्य प्रसादेन लोकत्रयजितो भवेत् ॥ ४ ॥
तत्साधनविधिं वक्ष्ये नृणां सिद्धिकरं द्रुतम् ।
(वियत्समकरं हनुमते तदनन्तरम्) ॥
रुद्रात्मकाय कवचं फडिति द्वादशाक्षरम् ॥ ५ ॥
अयं मन्त्रः समाख्यातः गोपनीयः प्रयत्नतः ।
तव स्नेहेन भक्त्या च दासोऽस्मि तव सुन्दरि ! ॥ ६ ॥
अयं मन्त्रो ह्यर्जुनाय पुरा दत्तस्तु शौरिणा ।
यो जपेत् साधनं कृत्वा जितं सर्वचराऽचरम् ॥ ७ ॥
नदीकूले विष्णुगेहे निर्जने पर्वते वने ।
एकाग्रचित्तमाधाय साधयेत् साधनं महत् ॥ ८ ॥
महाशैलं समुत्पाट्य धावन्तं रावणं प्रति ।
तिष्ठ तिष्ठ रणे दुष्ट ! मम जीवन् विमोक्ष्यसे ॥ ९ ॥
इति ब्रुवन्तं कोपेन क्रोधरक्तमुखाम्बुजम् ।
भोगीन्द्राभं स्वलाङ्गूलमुत्क्षिपन्तं मुहुर्मुहुः ॥१०॥
लाक्षारक्तारुणं रौद्रं कालान्तक-यमोपमम् ।
ज्वलदग्निसमं नेत्रे सूर्यकोटिसमप्रभम् ॥११॥

अङ्गदाद्यैर्महावीरैर्वेष्टितं रुद्ररूपिणंम् ।
एवं रूपं हनूमन्तं ध्यात्वा यः पूजयेन्मनुम् ॥१२॥
लक्षजापात् प्रसन्नः स्यात् सत्यं ते कथितं मया ।
ध्यानैकमाश्रितः पुंसां सिद्धिरेव न संशयः ॥१३॥
प्रातः स्नात्वा नदीतीरे उपविश्य कुशासने ।
प्राणायामं षडङ्गं च मूलेन सकलं चरेत् ॥१४॥
पुष्पाञ्जल्यष्टकं दत्त्वा ध्यात्वा रामं स-सीतकम् ।
ताम्रपात्रे ततः पद्ममष्टपत्रं स-केसरम् ॥१५॥
रक्त - चन्दन-घृष्टेन लिखेत्तस्य शलाकया ।
कर्णिकायां लिखेन्मन्त्रं तत्राऽऽवाह्य कपिप्रभुम् ॥१६॥
कर्णिकायां यजेदेवं दत्त्वा पाद्यादिकं ततः ।
गन्ध-पुष्पादिकं चैव नैवेद्यं मूलमन्त्रतः ॥१७॥
सुग्रीवं च हनूमन्तमङ्गदं नलनीलकम् ।
जाम्बवन्तं च कुमुदं केसरिणं दले दले ॥१८॥
पूर्वादिक्रमतो देवि ! पूजयेद् गन्ध-चन्दनैः ।
पवनं चाऽञ्जनीं चैव पूजयेद्दक्षवामतः ॥१९॥
दलाग्रेषु क्रमात् पूज्या लोकपालास्ततः परम् ।
ध्यात्वा जपेन्मन्त्रराजं लक्षं यावत्तु साधकः ॥२०॥
लक्षान्ते दिवसं प्राप्य कुर्याच्च पूजनं महत् ।
एकाग्रमनसा धीमांस्तस्मिन् पवननन्दने ॥२१॥
दिवा-रात्रौ जपं कुर्याद् यावत् सन्दशनं भवेत् ।
सुदृढं साधकं मत्वा निशीथे पवनात्मजः ॥२२॥

सुप्रसन्नस्ततो भूत्वा प्रयाति साधकाग्रतः ।
यथेप्सितं वरं दत्त्वा साधकाय कपिप्रभुः ॥२३॥
सर्वसौख्यमवाप्नोति विहरेदात्मनः सुखैः ।
एतच्च साधनं पुण्यं देवानामपि दुर्लभम् ॥२४॥
तव स्नेहात् समाख्यातं भक्ताऽसि यदि पार्वतिः! ॥२५॥

इति गरुडतन्त्रे देवीश्वरसंवादे द्वादशाक्षरसाधनं समाप्तम् ।

हनुमतो विग्रहं च लिख्यते वीरसाधनम् ।
ब्राह्मे मुहूर्ते चोत्थाय कृतनित्यक्रियो द्विजः ॥ १ ॥
गत्वा नदीं ततः स्नात्वा तीर्थमावाह्य चाऽष्टधा ।
मूलमन्त्रं ततो जप्त्वा सिञ्चेदोमित्यसंख्यया ॥ २ ॥
ततो वासः परीधाय गङ्गातीरेऽथवा गृहे ।

उपविश्य आं अङ्गुष्ठाभ्यां नमः । आं हृदयाय नमः । इत्यादिना च कराङ्ग-न्यासौ कुर्यात् । ततः प्राणायामः । आकारादि-वर्णमुच्चरन् वामनासापुटेन रेचयेत् । एवं वारत्रयं कृत्वा, मन्त्रवर्णानुच्चरन्नङ्गन्यासं कुर्यात् । ततो ध्यानम्—

ध्यायेद्रणे हनूमन्तं कपिकोटि - समन्वितम् ।
धावन्तं रावणं जेतुं दृष्ट्वा सत्त्वर-शाश्वतम् ॥ १ ॥
लक्ष्मणं च महावीरं पतितं रणभूतले ।
गुरुं च क्रोधमुत्पाद्य गृहीत्वा गुरुपर्वतम् ॥ २ ॥
हाहाकारैः सदर्पैश्च कम्पयन्तं जगत्त्रयम् ।
आब्रह्मस्तम्बपर्यन्तं कृत्वा भीमं कलेवरम् ॥ ३ ॥

इति ध्यात्वाऽष्टसहस्रं जपेत् । अस्य मन्त्रः—

श्रीबीजं पूर्वमुच्चार्य पवनं च ततो वदेत् ।
नन्दनं च ततो देयं ङेऽवसानेऽनलप्रिया ॥ ४ ॥
[1]दशार्णोऽयं मनुः प्रोक्तो नराणां सुरपादपः ।

यः सप्तदिवसं महाभयं दत्त्वा त्रिभागशेषासु निशासु नियतमागच्छति। यदि साधको मायां तरति, ईप्सितं वरं प्राप्नोति ।

विद्यां वाऽपि धनं वाऽपि राज्यं वा शत्रुनिग्रहम् ।
तत्क्षणादेव चाऽऽप्नोति सत्यं सत्यं सुनिश्चितम् ॥ ५ ॥

इति पण्डितश्रीशिवदत्तमिश्रशास्त्रिरचिते हनुमद्-रहस्ये
हनुमत्कल्पं समाप्तम् ।

हनुमद्व्रत-पूजा-पद्धतिः

तत्राऽऽदौ हनुमद्व्रतं कर्त्तुमारभमाण आचाराऽनुसारेण विशिष्टाचार-परम्पराप्राप्तां यथाशक्तिद्रव्यैः पम्पापूजां करिष्ये, इति सङ्कल्प्य, मार्गशीर्षमासे शुक्लत्रयोदश्यां व्रतं करिष्यमाणः द्वादश्यामेव नियतो ब्रह्मचारी जितेन्द्रयः सम्यग्-रात्रिं यापयित्वा ब्राह्मे मुहूर्ते उत्थाय कर्तव्यं सर्वमालोकयति ।

मार्गशीर्ष शुक्लत्रयोदशी को हनुमद्व्रत प्रारम्भ करने वाले व्यक्ति को चाहिए कि वह सर्वप्रथम अपने कुलपरम्परानुसार यथाशक्ति सामग्री से 'पम्पापूजां करिष्ये' इस प्रकार संकल्प कर, मार्गशीर्ष शुक्लद्वादशी के दिन जितेन्द्रिय एवं ब्रह्चर्य पालन करता हुआ, उस रात्रि के बाद ब्राह्म मुहूर्त में उठकर इस हनुमद्व्रत को करे ।

---

१. 'श्रीं पवननन्दनाय स्वाहा' इत्ययं हनुमतो दशाक्षरो मन्त्रः ज्ञेयः ।

शौनकाद्या उचुः

हनुमद्व्रतसङ्कल्पं कर्त्तुकामोऽब्रवीज्जनः ।
कस्मिन् देशे व्रतं सम्यक् कर्त्तव्यं वद सूतज ! ? ॥ १ ॥
किं च व्रतं पूर्वतरैः कुत्राऽऽचरितमद्भुतम् ।
सन्ति स्थलानि बहुधा गोष्ठ-वृन्दावनादयः ॥ २ ॥
वापी-कूप-तडागाद्याः कुल्याः कृत्रिम-विस्तृताः ।
नद्यो नदाः सागराद्याः पर्वताः सरितो द्रुमाः ॥ ३ ॥
विचार्य बहुधा तच्च वद नो वदतां वर ! ? ।

सूत उवाच

साधु पृष्टं महाभागाः सम्यगेवोच्यते मया ॥ ४ ॥
बहवः सन्ति देशाश्च पुण्याः पुण्यविवर्धनाः ।
तथाऽपि वक्ष्ये यद् गुह्यं तच्छृण्वन्तु मुनीश्वराः ॥ ५ ॥

शौनकादि ऋषियों ने व्यासजी से कहा—इस हनुमद्-व्रत करने वाले प्राणी को किस देश में इस व्रत को करना चाहिए, यह बताने की कृपा करें ? ॥ १ ॥ पूर्व में इस व्रत को किस ने और किस स्थान पर किया ? । कारण कि, यों तो गोशाला, वृन्दावन आदि पुनीत तीर्थ, वापी (बावली), कूप, छोटे-बड़े तालाब, नदी, नद, समुद्र, पर्वत, नदियाँ, पुनीत वृक्ष आदि किन स्थानों में इस व्रत को करना चाहिए ? हे मुनिश्रेष्ठ ! यह बताने की कृपा करें ? ॥ २-३½ ॥

सूत जी ने कहा—हे मुनीश्वरो ! आपने बहुत सुन्दर प्रश्न किया। यद्यपि पुण्यवर्धक अनेक पवित्र देश एवं अनेक स्थान हैं, तथापि मैं अति गोपनीय रहस्य का निरूपण करता हूँ, आप सभी सावधान होकर श्रवण करें ॥ ३½-५ ॥

पूर्वं हनुमतः पूजा कृता पम्पासरित्तटे ।
तस्मात् पम्पासरित्तीरे हनुमद्व्रतमुत्तमम् ॥ ६ ॥
नानादेशेषु कर्तव्या पम्पापूजा प्रयत्नतः ।
ब्राह्मे मुहूर्ते चोत्थाय शौचादिभिरतन्द्रितः ॥ ७ ॥
नित्यकर्म-समाप्याऽऽशु योग-क्षेमं समाविशेत् ।
ततश्च पञ्चभिर्वाद्यैरुपेतो बन्धुभिर्वृतः ॥ ८ ॥
तत्रत्यां च नदीं काञ्चिद् गत्वा स्नात्वा च वाग्यतः ।
अघमर्षणमंत्रैश्च शुचिः प्रयतमानसः ॥ ९ ॥
सन्ध्यावन्दनपूर्वं च नित्यकर्म समाप्य च ।
पितॄन् सन्तर्प्य यत्नेन ललाटे तिलकोज्ज्वलः ॥१०॥
षोडशाऽप्युपचारांश्च पम्पायाः सर्वतो व्रती ॥११॥

सर्व-प्रथम महर्षियों ने पम्पासरोवर के तट पर हनुमान्जी का पूजन किया। अत एव इस उत्तम हनुमद्-व्रत को पम्पा सरोवर के तट पर ही करना चाहिए ॥ ६ ॥ इस हनुमद्व्रत के पूजन के पूर्व सर्व-प्रथम सर्वत्र पम्पासरोवर का पूजन करे। साधक को चाहिए कि वह आलस्य रहित होता हुआ, ब्राह्ममुहूर्त में उठकर, नित्य-नैमित्तिक कर्म समाप्त कर, हनुमान्जी के व्रत को इस प्रकार आरम्भ करे। पश्चात् अपने बन्धु-बान्धवों के साथ बैंड, शहनाई आदि बाजा बजवाता हुआ अपने स्थान के समीप किसी नदी में स्नान एवं अघमर्षण मन्त्र से अपने को शुद्ध कर, तथा सन्ध्या-वन्दनादि नित्यकर्म समाप्त कर, पितृतर्पण के बाद मस्तक पर सुन्दर तिलक लगाकर, षोडशोपचार पूजन सामग्री से उस नदी में ही पम्पा की भावना कर पूजन करे ॥७-११॥

पम्पापूजा

आवाहनम्—हेमकूट-गिरिप्रान्त जनानां गिरिसानुगाम् ।
पम्पामावाहयाम्यस्यां नद्यां हृद्यां प्रयत्नतः ॥१॥

आसनम्— तरङ्गशत-कल्लोलैरिङ्गत्तामरसोज्ज्वले ।
पम्पानदि ! नमस्तुभ्यं गृहाणासनमुत्तमम् ॥२॥

पाद्यम्— हृद्यं सुगन्धसम्पन्नं शुद्धं शुद्धाम्बुसत्कृतम् ।
पाद्यं गृहाण पम्पाख्ये महानदि ! नमोऽस्तु ते ॥३॥

अर्घ्यम्— भागीरथि ! नमस्तुभ्यं सलिलेन सुशोभने ।
अनर्घ्यमर्घ्यमनघे ! गृह्यतामिदमुत्तमम् ॥४॥

आचमनीयम्— पम्पानदि ! महापुण्ये ! सम्पादित-सुशोभने !
गोदावरि ! जलेनाऽद्य गृहाणाऽऽचमनीयकम् ॥५॥

पञ्चामृतस्नानम्— दुग्धाऽऽज्येक्षुरसैः पुण्यैर्दध्ना च मधुना तथा ।
पञ्चामृतैः स्नापयिष्ये पम्पानदि ! नमोऽस्तु ते ॥६॥

शुद्धोदकस्नानम्— शुद्धनीलैः शुद्धजलैर्नारिकेलाम्बुभिस्तथा ।
पुण्यैः कृष्णानदीतोयैः सिञ्चामि त्वां सरिद्वरे ॥७॥

वस्त्रम्— महामूल्यं च कार्पासं दिव्यवस्त्रमनुत्तमम् ।

पम्पापूजा—'हेमकूट०' से लेकर 'हृद्यां प्रयत्नतः' श्लोक पढ़कर पम्पा का आवाहन करे। 'तरङ्गशत०' श्लोक पढ़कर आसन, 'हृद्यं सुगन्धसम्पन्नं०' से पाद्य (जल), 'भागीरथि ! नमस्तुभ्यं०' से अर्घ्य, 'पम्पानदि ! महापुण्ये०' से आचमनीय जल प्रदान करे ॥१-५॥

'दुग्धा-ऽऽज्येक्षुरसैः०' से पंचामृतस्नान, 'शुद्धनीलैः शुद्धजलैः०' से शुद्धोदक स्नान कराकर, 'महामूल्यं च कार्पासं०' से वस्त्र, 'श्रौत-

पम्पानदि ! महापुण्ये पम्पाशोभाऽतिशोभने ॥ ८ ॥

यज्ञोपवी– श्रौत-स्मार्त्तादि-सत्कर्मफलदं पावनं शुभम् ।
तम्– यज्ञोपवीतमधुना कल्पये सरिदुत्तमे ॥ ९ ॥

गन्धम्– कर्पूरगुटिकामिश्रं कस्तूर्या च विमर्दितम् ।
यत्नेन कल्पितं गन्धं लेपयेऽङ्गं सरिद्वरे ॥१०॥

अक्षतान्—लक्षणोक्तान् हरिद्राक्तानक्षतांश्चोत्तमाञ्छुभान् ।
पम्पानदि ! गृहाणेमाञ्छुभशोभातिवृद्धये ॥११॥

कुङ्कुमम्- अतसीकुसुमोपेतं पङ्करुहदलोज्ज्वलम् ।
कुङ्कुमं शङ्करजटाशम्भूते सरिदर्पये ॥१२॥

नेत्राञ्ज– कज्जलं त्रिजगद्वन्द्ये महापुण्यतरङ्गिणि ।
नम्— नेत्रयोः पादमनघं गृह्यतां सरितांवरे ॥१३॥

पुष्पाणि– शतपत्रैश्च कल्हारैः कुमुदैर्बकुलैरपि ।
मल्लिका-जाति-पुन्नागैः केवलैश्चाऽपि चम्पकैः॥१४॥
तुलसीदामभिश्चाऽपि तथा बिल्वदलैरपि ।
पूजयामि महापुण्ये पम्पानदि नमोऽस्तु ते ॥१५॥

अंगपूजा

गोदावर्य्यै नमः, पादौ पूजयामि । कृष्णायै नमः, गुल्फौ

स्मार्त्तादि-सत्कर्म' से ज्ञोपवीत चढ़ावे । तत्पश्चात् 'कर्पूरगुटिकामिश्रं०' से गन्ध, 'लक्षणोक्तान् हरिद्राक्तान्०' से अक्षत, 'अतसी-कुसुमोपेतं०' से कुंकुम (रोरी), 'कज्जलं त्रिजगद्वन्द्ये०' से अंजन, शतपत्रैश्च कह्लारैः०' से लेकर 'पम्पानदि ! नमोऽस्तु ते' पर्यन्त श्लोक पढ़कर अनेक प्रकार के सुगन्धित पुष्प आदि चढ़ावे ॥ ९-१५ ॥

पूजयामि। पापहारिण्यै नमः, जङ्घे पूजयामि। सुभ्रुवे नमः, जानुनी पूजयामि। उरुतरङ्गिण्यै नमः, उरू पूजयामि। तडिदुज्ज्वलजवायै नमः, कटिं पूजयामि। अम्बुशोभिन्यै नमः, नितम्बं पूजयामि। अणुमध्यायै नमः, मध्यं पूजयामि। सुस्तनायै नमः, स्तनौ पूजयामि। कम्बुकण्ठायै नमः, कण्ठं पूजयामि। ललितबाहुतरङ्गायै नमः, बाहू पूजयामि। दीर्घवेण्यै नमः, वेणीं पूजयामि। सुवक्त्रायै नमः, वक्त्रं पूजयामि। दुर्वारवारिपूरायै नमः, शिरः पूजयामि। सहस्रमुखायै नमः, सर्वाङ्गं पूजयामि ॥ १६ ॥

धूपम्—स-दशाङ्गं शुभं दिव्यं स-गुग्गुलमनुत्तमम्।
साज्यं परिमलोद्भूतं धूपं स्वीकुरु पावने ॥१७॥

दीपम्— साज्यमग्नि-प्रकाशोद्यत्-कोटिसूर्य-समद्युतिम्।
पश्य दीपं प्रसन्नाङ्गे पम्पानदि ! नमोऽस्तु ते ॥१८॥

नैवेद्यम्—शाल्यन्नं स्वर्णपात्रस्थं शाका-ऽपूप-समन्वितम्।
साज्यं दधि-पायसं च नैवेद्यं प्रतिगृह्यताम् ॥१९॥

ताम्बूलम्—पूगैः सुशोभनैश्चाऽपि नागवल्लीदलैर्युतम्।
ताम्बूलं गृह्यतां देवि!पम्पानदि!नमोऽस्तु ते ॥२०॥

सुवर्णपुष्पम्—व्रतपूर्ति -महाकीर्ति-दीव्यस्फूर्ति-प्रकीर्तिदम्।
कर्तुकामो व्रतमिदं सौवर्णं पुष्पमर्पये ॥२१॥

अंगपूजा—तत्पश्चात् 'गोदावर्य्यै नमः' से लेकर, सहस्रमुखायै नमः, सर्वाङ्गं पूजयामि' तक पढ़ कर, प्रत्येक अंगों में पुष्प चढ़ावे ॥ १६ ॥

'स-दशाङ्गं शुभं०' इस श्लोक से धूप, 'साज्यमग्नि०' से दीप, 'शाल्यन्नं स्वर्णपात्रस्थं०' से नाना प्रकार के नैवेद्य का भोग लगाकर, 'पूगैः सुशोभनैश्चाऽपि०' से ताम्बूल प्रदान करे ॥ १७-२० ॥

प्रदक्षिणाम्—प्रदक्षिणत्रयं देवि ! प्रयत्नेन प्रकल्पितम् ।
पश्याऽद्य पावने देवि!पम्पानदि!नमोऽस्तु ते ॥२२॥

नमस्कारम्—नमस्ते नमस्ते विशालोज्ज्वलाङ्गे
नमस्ते नमस्ते लसत्सत्तरङ्गे ।
नमस्ते नमस्ते गिरिप्रान्तरङ्गे
नमस्ते नमस्ते कलद्बर्हिरङ्गे ॥२३॥

क्षमापनम्—अपराधशतं देवि ! मत्कृतं च दिने दिने ।
क्षम्यतां पावने देवि ! पम्पानदि नमोऽस्तु ते ॥२४॥

फलश्रुतिः—पम्पानदि ! महापुण्य-तरङ्गिणि ! नमोऽस्तु ते ।
त्वत्तीरे हनुमत्पूजा कृता रामेण धीमता ॥२५॥
मनोरथफलाऽवाप्तिस्तस्याऽभीष्टं न संशयः ।
सुग्रीवेण च तीरेऽस्मिन् कपिवर्यपतेर्व्रतम् ॥२६॥
सत्कृतं च मनोवाञ्छा सद्यस्तस्य बभूव सा ।
अतस्त्वन्नीरपुलिने कृते हनुमतो व्रते ॥२७॥

तत्पश्चात् 'व्रतपूर्ति-महाकीर्ति०' से सुवर्ण-पुष्प (कटसरैया) समर्पित कर, 'प्रदक्षिणत्रयं देवि ! ०' से प्रदक्षिणा एवं 'नमस्ते नमस्ते विशालोज्ज्वलाङ्गे०' श्लोक पढ़कर नमस्कार करता हुआ 'अपराध-शतं देवि !०' श्लोक से क्षमा-याचना करे ॥ २१-२४ ॥

फलश्रुति — सूतजी ने ऋषियों से कहा—मर्यादापुरुषोत्तम भगवान् राम ने पम्पा तीर पर स्वयं हनुमान्‌जी का पूजन महापुण्य तरंगों वाले पम्पा सरोवर को नमस्कार करते हुए किया ॥ २५ ॥ इस सरोवर का पूजन करने वालों के समस्त मनोरथ निश्चित ही पूर्ण होते हैं, कपिश्रेष्ठ हनुमान्‌जी का व्रत सुग्रीव ने भी पम्पा तट पर

श्रेयांसि मम सर्वाणि न विघ्नानि भवन्त्विह।
इति सम्प्रार्थ्य पम्पाख्यां नदीं शुभतरङ्गिणीम्॥२८॥
कलशोदकपाणिश्च गच्छेत् स्वगृहमादरात्॥२९॥

इति पम्पा-पूजा समाप्ता।

*

हनुमत्पूजा

पूर्वोच्चरितैवं गुणेति देशकालौ स्मृत्वा, मयाऽऽचरितस्य व्रतस्य आचीर्यमाणस्य च व्रतस्य सम्पूर्णफलावाप्त्यर्थं भार्यया सह हनुमत्पूजां करिष्ये। तदङ्गत्वेन प्रणवपूर्वकं गणेशपूजनं कृत्वा, भूशुद्धिं भूतशुद्धिं च कृत्वा, कलशाऽऽराधनं कृत्वा, पीठपूजां कुर्यात्।

किया॥ २६॥ जिससे उनका भी समस्त मनोरथ तत्क्षण पूर्ण हुआ। अतः साधक को चाहिए कि वह भी हनुमद्-व्रत करने के पूर्व इसी प्रकार पम्पा-सरोवर के तट पर हमारे व्रत में किसी प्रकार का भी विघ्न न हो तथा समस्त कार्य शुभकारी हों, इस प्रकार शुभ तरंगवाली पम्पा नदी से प्रार्थना करता हुआ तथा कलश में श्रद्धा-पूर्वक पम्पा का जल लेकर व्रती अपने घर आवे॥ २७-२९॥

इस प्रकार पम्पा-पूजा समाप्त।

हनुमत्पूजा—साधक को चाहिए कि वह आचमन, प्राणायाम, शान्ति पाठादि कर, हाथ में जल, अक्षत, द्रव्य और पुष्प लेकर, 'पूर्वोच्चरितैव' से लेकर 'हनुमत्पूजां करिष्ये' तक वाक्य पढ़कर, जल छोड़ दे। तत्पश्चात् प्रणवपूर्वक गणेश-पूजन, भूशुद्धि, भूतशुद्धि तथा कलश पूजन कर, इस प्रकार पीठ-पूजा करे।

पीठस्याऽधोभागे—अतलाय नमः। वितलाय नमः। सुतलाय नमः। रसातलाय नमः। तलाऽतलाय नमः। महातलाय नमः। सप्तपातालाय नमः। तत्राऽगाध-सर्वतोशब्दात्मने नमः। तत्र कमले—कमठाय नमः। तदुपरि—सहस्रमणि-फणाप्रकाशमानशेषाय नमः। अष्टदिग्गजेभ्यो नमः। तदुपरि—भूमण्डलाय नमः। तदुपरि—भूर्लोकाय नमः। भुवर्लोकाय नमः। स्वर्लोकाय नमः। जनलोकाय नमः। तपोलोकाय नमः। महर्लोकाय नमः। सत्य-लोकाय नमः। अष्टदिक्पालकेभ्यो नमः। तन्मध्ये—भैरवे नमः। मेरोर्दक्षिणदिग्भागे—कस्मैचिद्द्रोणशैलाय नमः। तन्मध्ये—सुतरवे नमः। तन्मूले—सुवर्णवेदिकायै नमः। वेद्यां वृक्षस्य पूर्वभागे—नवरत्न-खचित-चारु-रत्नपीठाय नमः। एवं सम्भावयित्वा, पञ्चरङ्गैः स्वस्तिक-शङ्ख-पद्मैश्च रङ्गवल्लिं विलिख्य, तन्मध्ये त्रयोदशपद्मं विलिख्य, तदुपरि—शुभ्रतन्दुलान् विनिक्षिप्य, नूतनकलशं स्थापयित्वा, शुद्धोदकेन कलशं पूरयित्वा, तदुपरि पीताम्बरं संस्थाप्य, त्रयोदशकमलमालिख्य, मणिकायाम्। 'ॐ नमो भगवते वायुनन्दनाय नमः' इति वर्णबीजानि पूर्वादिदलेषु

तत्पश्चात् उस हनुमत्-पीठ पर 'अतलाय नमः' से लेकर 'नव-रत्नखचित-चारुरत्नपीठाय नमः' पर्यन्त पढ़कर अक्षत छिड़के। पश्चात् पंचरंग तथा स्वस्तिक, शंख, पद्म आदि से रंगवल्ली का निर्माण कर, मध्य में तेरह पद्म (कमल) निर्मित कर, उस कमल पर चावल की ढेरी रख, उसपर नवीन कलश रखता हुआ तथा शुद्ध जल से उस कलश को भरकर, उसके ऊपर पीताम्बर रखकर, पुनः तेरह कमल निर्मित कर, उसके पत्र में पूर्वादि क्रम से 'ॐ नमो भगवते

क्रमेण विलिख्य, त्रयोदशग्रन्थियुक्तं हरिद्रादि-नवदोरकं प्रतिष्ठाप्य, प्राणयामपूर्वकं शुद्धान्तःकरण उत्तराभिमुख उपविश्य, सीतासमेतं श्रीरामचन्द्रध्यानादि-मानसं कृत्वा, श्रीहनुमन्तमावाहयेत् ।

श्रीहनुमतः प्राणा इह प्राणाः, हनुमतः जीव इह स्थितः सर्वेन्द्रियाणि वाङ्-मनस्त्वक्-चक्षु-जिह्वा-घ्राण-पाणि-पाद-पायूपस्थानि हनुमत इहागत्य सुखं चिरं तिष्ठन्तु स्वाहा ।

आवाहनम्--श्रीरामचरणाम्भोज - युगलस्थिरमानसम् ।
आवाहयामि वरदं हनुमन्तमभीष्टदम् ।। १ ।।

ध्यानम्--कर्णिकार-सुवर्णाभं वर्णनीयं गुणोत्तमम् ।
अर्णवोल्लङ्घनोद्युक्तं तूर्णं ध्यायामि मारुतिम्।। २ ।।

आसनम् -नवरत्नमयं दिव्यं चतुरस्रमनूत्तमम् ।
सौवर्णमासनं तुभ्यं कल्पये कपिनायक ! ।। ३ ।।

पाद्यम्--सुवर्णकलशानीतं सुष्ठु वासितमादरात् ।
पादयोः पाद्यमनघं प्रतिगृह्ण प्रसीद मे ।। ४ ।।

वायुनन्दनाय नमः' के प्रेत्येक वर्ण लिखकर, हरदी आदि मांगलिक द्रव्य से युक्त तेरह ग्रन्थि (गाँठ) वाले नवीन डोरे को, उस कलश पर प्रतिष्ठित करे। तत्पश्चात् आचमन, प्राणायाम कर, उत्तराभिमुख बैठकर, सीता समेत श्रीरामचन्द्र का मानसिक ध्यान करता हुआ पवनपुत्र श्री हनुमान्जी का आवाहन करे।

हाथ में अक्षत लेकर 'श्रीहनुमतः प्राणा इह०' से 'चिरं तिष्ठन्तु स्वाहा' पर्यन्त पढ़कर, प्राण-प्रतिष्ठा करता हुआ 'श्रीरामचरणाम्भोज०' इस श्लोक से आवाहन करे ।। १ ।। तत्पश्चात् 'कर्णिकारसुवर्णाभं०' से ध्यान, 'नवरत्नमयं०' से आसन, 'सुवर्णकलशानीतं०' श्लोक से

अर्घ्यम्—कुसुमा-ऽक्षत-सम्मिश्रं गृह्यतां कपिपुङ्गव ! ।
दास्यामि तेऽञ्जनीपुत्र ! स्वमर्घ्यं रत्नसंयुतम् ॥५॥
आचमनम्-महाराक्षस-दर्पघ्न ! सुराधिप-सुपूजित ! ।
विमलं शमलघ्न ! त्वं गृहाणाऽऽचमनीयकम् ॥६॥
पञ्चामृतस्नानम्—मध्वाज्य-क्षीर-दधिभिः स-गुडैर्मन्त्रसंयुतैः।
पञ्चामृतैः पृथक् स्नानैः सिञ्चामि त्वां कपीश्वर ! ॥७॥
शुद्धोदकस्नानम्—सुवर्णकलशानीतैर्गङ्गादि-सरिदुद्भवैः ।
शुद्धोदकैः कपीश ! त्वामभिषिञ्चामि मारुते ॥८॥
कटिसूत्रम्—ग्रथितां नवभीरत्नैर्मेखलां त्रिगुणीकृताम् ।
मौञ्जं मौञ्जीमयीं पीतां गृहाण पवनात्मज ! ॥९॥
कौपीनम्— कटिसूत्रं गृहाणेदं कौपीनं ब्रह्मचारिणः ।
कौशेयं कपिशार्दूल ! हरिद्राक्तं सुमङ्गलम् ॥१०॥
उत्तरीयम्—पीताम्बर-सुवर्णाभमुत्तरीयार्थमेव च ।
दास्यामि जानकीप्राण-त्राणकरण गृह्यताम् ॥११॥
यज्ञोपवीतम्—श्रौतस्मार्त्तादिकर्तॄणां साङ्गोपाङ्गफलप्रदम् ।
यज्ञोपवीतमनघं धारयानिलनन्दन ! ॥१२॥

पाद्य, 'कुसुमाक्षत-सम्मिश्रं०' से अर्घ्य, 'महाराक्षस-दर्पघ्न०' से आचमन, तथा 'मध्वाज्य-क्षीर-दधिभिः०' से पंचामृत स्नान कराता हुआ 'सुवर्णकलशानीतैः०' से शुद्धोदक स्नान करावे ॥ २-८॥

तत्पश्चात् 'ग्रथितां नवभीरत्नैर्मेखलां०' से करधनी, 'कटिसूत्रं गृहाणेदं०' से कौपीन एवं 'पीताम्बर-सुवर्णाभं०' से उत्तरीय वस्त्र, 'श्रौत-स्मार्त्तादिकर्तॄणां०' से यज्ञोपवीत धारण करावे ॥९-१२॥

गन्धम्—दिव्यकर्पूर-संयुक्तं मृगनाभिसमन्वितम् ।
स-कुङ्कुमं पीतगन्धं ललाटे धारय प्रभो ! ॥१३॥
अक्षतान्—हरिद्राक्तानक्षतांस्त्वं कुङ्कुमद्रव्यमिश्रितान् ।
धारय श्रीगन्धमध्ये शुभशोभनवृद्धये ॥१४॥
पुष्पाणि—नीलोत्पलैः कोकनदैः कह्लारैः कमलैरपि ।
कुमुदैः पुण्डरीकैस्त्वां पूजयामि कपीश्वर ! ॥१५॥
मल्लिका-जातिपुष्पैश्च पाटलैः कुटजैरपि ।
केतकी - बकुलैश्चूतैः पुन्नागैर्नागकेसरैः ॥१६॥
चम्पकैः शतपत्रैश्च करवीरैर्मनोहरैः ।
पूजये त्वां कपिश्रेष्ठ ! स-बिल्वैस्तुलसीदलैः ॥१७॥

ग्रन्थिपूजा

अञ्जनीसूनवे नमः, प्रथमग्रन्थिं पूजयामि । हनुमते नमः, द्वितीयग्रन्थिं पूजयामि । वायुपुत्राय नमः, तृतीयग्रन्थिं पूजयामि। महाबलाय नमः, चतुर्थग्रन्थिं पूजयामि। रामेष्टाय नमः, पञ्चमग्रन्थिं पूजयामि । फाल्गुनसखाय नमः, षष्ठग्रन्थिं पूजयामि । पिङ्गाक्षाय नमः, सप्तमग्रन्थिं पूजयामि । अमितविक्रमाय नमः, अष्टमग्रन्थिं पूजयामि। कपीश्वराय नमः, नवमग्रन्थिं पूजयामि। सीताशोकविनाशनाय नमः, दशमग्रन्थिं पूजयामि । लक्ष्मणप्राण-

---

तदनन्तर 'दिव्यकर्पूरसंयुक्तं०' से गन्ध, 'हरिद्राक्तानक्षतान्०' से अक्षत, 'नीलोत्पलैः०' से लेकर 'स-बिल्वैस्तुलसीदलैः' तक श्लोक पढ़ कर, अनेक प्रकार के सुगन्धित पुष्प समर्पित करे ॥१३–१७॥
तत्पश्चात नवीन डोरे के तेरह ग्रन्थियों का क्रमशः 'अञ्जनीसूनवे

दात्रे नमः, एकादशग्रन्थिं पूजयामि। दशग्रीवदर्पघ्नाय नमः, द्वादशग्रन्थिं पूजयामि। भविष्यद्-ब्रह्मणे नमः, त्रयोदशग्रन्थिं पूजयामि।

इति ग्रन्थिपूजा समाप्ता।

अंगपूजा

हनुमते नमः, पादौ पूजयामि। सुग्रीवसखाय नमः, गुल्फौ पूजयामि। अङ्गदमित्राय नमः, जङ्घे पूजयामि। रामदासाय नमः, ऊरू पूजयामि। अक्षघ्नाय नमः, कटिं पूजयामि। लङ्कादहनाय नमः, बालं पूजयामि। राममणिदाय नमः, नाभिं पूजयामि। सागरोल्लङ्घनाय नमः, मध्यं पूजयामि। लङ्कामर्दनाय नमः, केशावलिं पूजयामि। सञ्जीवनीहर्त्रे नमः, स्तनौ पूजयामि। सौमित्रिप्राणदाय नमः, वक्षःपूजयामि। कुण्ठितदशकण्ठाय नमः, कण्ठं पूजयामि। रामाभिषेककारिणे नमः, हस्तौ पूजयामि। मन्त्ररचितरामायणाय नमः, वक्त्रं पूजयामि। प्रसन्नवदनाय नमः, वदनं पूजयामि। पिङ्गनेत्राय नमः, नेत्रे पूजयामि। श्रुतिपारगाय नमः, श्रुतिं पूजयामि। ऊर्ध्वपुण्ड्रधारिणे नमः, कपोलं पूजयामि। मणिकण्ठमालिने नमः, शिरः पूजयामि। सर्वाभीष्टप्रदाय नमः, सर्वाङ्गं पूजयामि।

दिव्यं सुगुग्गुलं साज्यं स-दशाङ्गं स-वह्निकम्।

नमः' से लेकर 'भविष्यद्-ब्रह्मणे नमः' पर्यन्त पढ़कर, पूजन करे।

तदनन्तर 'हनुमते नमः, पादौ पूजयामि' से लेकर, 'सर्वाभीष्टप्रदाय नमः, सर्वाङ्गं पूजयामि' तक पढ़कर, श्री हनुमान्‌जी के समस्त अंगों का

गृहाण मारुते ! धूपं सुप्रियं घ्राणतर्पणम् ॥ १८ ॥
इति श्रीहनुमते धूपं समर्पयामि ।
घृतपूरितमुज्ज्वालं सितसूर्यसमप्रभम् ।
अतुलं तव दास्यामि व्रतपूर्त्यै सुदीपकम् ॥ १९ ॥
इति श्रीहनुमते दीपं समर्पयामि ।
स-शाका-ऽपूप-सूपाढ्य-पायसानि च यत्नतः ।
स-क्षीर-दधि-साज्यं च सापूपं घृतपाचितम् ॥ २० ॥
इति श्रीहनुमते नैवेद्यं समर्पयामि ।
गोदावरीजलं शुद्धं स्वर्णपात्राऽऽहृतं प्रियम् ।
पानीयं पावनोद्भूतं स्वीकुरु त्वं दयानिधे ! ॥ २१ ॥
इति श्रीहनुमते पानीयं समर्पयामि ।
आपोशनं नमस्तेऽस्तु पापराशितृणानलम् ।
कृष्णावेणीजलेनैव कुरुष्व पवनात्मज ! ॥ २२ ॥
इति श्रीहनुमते उत्तरापोशनं समर्पयामि ।
दिवाकर-सुतानीत-जलेन स्पर्शगन्धिना ।
हस्तप्रक्षालनार्थाय स्वीकुरुष्व दयानिधे ! ॥ २३ ॥
इति श्रीहनुमते हस्तप्रक्षालनं समर्पयामि ।
रघुवीर-पदन्यास-स्थिरमानसमारुते ! ।

पूजन करता हुआ 'दिव्यं सुगुग्गुलं०' इस श्लोक से धूप जलावे ॥१८॥
तत्पश्चात् 'घृतपूरित०' से दीप, 'सशाकाऽपूप०' से नैवेद्य, 'गोदावरीजलं शुद्धं०' से जल, 'आपोशनं नमस्तेऽस्तु०' से उत्तरा-

कावेरीजलपूर्णेन स्वीकुर्वाचमनीयकम् ॥२४॥

इति श्रीहनुमते शुद्धाचमनीयं समर्पयामि ।

वायुपुत्र ! नमस्तुभ्यं पुष्पं सौवर्णकं प्रियम् ।
पूजयिष्यामि ते मूर्ध्नि नवरत्नस-समुज्ज्वलम् ॥२५॥

इति श्रीहनुमते सुवर्णपुष्पं समर्पयामि ।

ताम्बूलमनघ स्वामिन् ! प्रयत्नेन प्रकल्पितम् ।
अवलोकय नित्यं ते पुरतो रचितं मया ॥२६॥

इति श्रीहनुमते ताम्बूलं समर्पयामि ।

शतकोटि–महारत्न – दिव्य – सद्रत्नपात्रके ।
नीराजनमिदं दृष्टेरतिथी कुरु मारुते ! ॥२७॥

इति श्रीहनुमते नीराजनं समर्पयामि ।

मूर्धानं दिवो अरतिं पृथिव्या वैश्वानर अमृत आ जातमग्निम् ।
कविं सम्राजमतिथिं जनानामासन्ना पात्रं जनयन्त देवाः ॥२८॥

इति मन्त्रेण श्रीहनुमते पुष्पाञ्जलिं समर्पयामि ।

पापोऽहं पापकर्माऽहं पापात्मा पापसम्भवः ।
त्राहि मां पुण्डरीकाक्ष ! त्वमेव शरणं मम ॥२९॥

इति श्रीहनुमते प्रदक्षिणां समर्पयामि ।

नमस्तेऽस्तु महावीर ! नमस्ते वायुनन्दन ! ।

पोशन, 'दिवाकर-सुता०' से हस्त प्रक्षालन, 'रघुवीरपदन्यास०' से शुद्ध आचमनीय जल प्रदान करता हुआ, 'वायुपुत्र नमस्तुभ्यं०' से हनुमान्जी को सुवर्णपुष्प (कटसरैया) चढ़ावे ॥१९–२५॥

उसी प्रकार 'ताम्बूलमनघ०' से ताम्बूल तथा 'शतकोटि-महारत्न०', से आरती कर, 'मूर्धानं दिवः०' इस मन्त्र से पुष्पांजलि, 'पापोऽहं०'

विलोक्य कृपया नित्यं त्राहि मां भक्तवत्सल ! ॥३०॥

इति श्रीहनुमते नमस्कारं समर्पयामि ।

ये पुत्र-पौत्रादि-समस्तभाग्यं, वाञ्छन्ति वायोस्तनयं प्रपूज्य।
त्रयोदशग्रन्थियुतं तदङ्गं, बध्नन्ति हस्ते वरदोरसूत्रम् ॥३१॥

दोरग्रहणम्—अञ्जनीगर्भसम्भूत! रामकार्यार्थसम्भव ! ।
वरदोरकृताभासारक्ष मां प्रतिवत्सरम् ॥३२॥

पूर्वदोरकोत्तारणम्—अनेन भगवन् कार्यं प्रतिपादकविग्रहम्।
हनूमान् प्रीणयित्वा च प्रार्थितो हृदि तिष्ठतु ॥३३॥

प्रार्थना—यस्य स्मृत्या च नामोक्त्या तपो-यज्ञ-क्रियादिषु ।
न्यूनं सम्पूर्णतां यातु सद्यो याति पराङ्गतिम् ॥३४॥

वायनदानम्—तदङ्गत्वेन ब्राह्मणपूजनम् ।
ददाति प्रतिगृह्णाति हनूमानेव न स्वयम् ।
व्रतस्याऽस्य च पूर्त्यर्थं प्रतिगृह्णातु वायनम् ॥३५॥
इति वायनमन्त्रः ।

इति हनुमद्-रहस्ये हनुमत्पूजा-विधानं सम्पूर्णम् ।

*

से प्रदक्षिणा, 'नमस्तेऽस्तु महावीर' इससे नमस्कार करे ॥२६-३०॥

तत्पश्चात् 'ये पुत्र-पौत्रादि०' से तेरह ग्रन्थिवाला नवीन डोरा धारण कर, 'अञ्जनीगर्भसम्भूत०' से पुराना डोरा उतार दे। तदनन्तर 'अनेन भगवन् कार्यं०' से नमस्कार पूर्वक 'यस्य स्मृत्या०' से ग्यारह बार 'विष्णवे नमः' का उच्चारण कर 'ददाति प्रतिगृह्णाति०' से ब्राह्मण को वायन प्रदान करे॥३१-३५॥ इस प्रकार हनुमत्-पूजा समाप्त।

हनुमद्-व्रतोद्यापन-विधिः

यजमानो महानद्यां माध्याह्निकस्नानं कृत्वा, नित्यकर्म विधायाऽऽचार्य-ब्रह्म-ऋत्विग्भिः सहोपविश्य, प्राणानायम्य, एवं गुणेत्यादि शुभतिथौ धर्मपत्नीसमेतस्य मम हनुमद्-व्रतकल्पोक्त-सम्पूर्णफलाऽवाप्तये धर्माऽ-र्थ-काम-मोक्ष-चतुर्विध-पुरुषार्थसिद्धयर्थं श्रीमदाञ्जनेयप्रीत्यर्थं च हनुमद्व्रतोद्यापनाख्यं कर्म करिष्ये।

अस्मिन् कर्मणि आचार्यत्वं भवन्तः कुर्वन्त्विति वेदवेत्तारं कुटुम्बिनं वित्तहीनं शान्तमाचारवन्तं ब्राह्मणमाचार्यत्वे नियोज्य, एवं लक्षणसंयुक्तमपरं ब्राह्मणं ब्रह्मत्वे नियोज्य, ततः त्रयोदशकलशावाहनार्थं त्रयोदशब्राह्मणानृत्विग्विधौ नियोज्य, एवमावरणं कृत्वा, ततो निष्कमात्रसुवर्णेन, तदर्धेन यथाशक्त्या हनुमत्प्रतिमां कृत्वा, प्राणानायम्य, हनुमद्-व्रतोद्यापनाङ्गत्वेन पम्पापूजां कृत्वा, पुनः प्राणानायम्य, शुभतिथौ धर्मपत्नीसमेतस्य मम मनोवाञ्छाफलसिद्धयर्थं श्रीमदाञ्जनेयप्रीत्यर्थमाञ्जनेयप्रतिमापूजां करिष्ये। इति सङ्कल्प्य, तत्प्रतिमा-

---

उद्यापन—यजमान को चाहिए कि वह नदी में माध्याह्निक स्नान एवं नित्य कर्म कर, आचार्य, ब्रह्मा एवं होताओं के साथ मण्डप में बैठकर आचमन, प्राणायाम कर हाथ में जल लेकर 'एवं गुणेत्यादि॰' से 'उद्यापनाख्यं कर्म करिष्ये' पर्यन्त पढ़कर भूमि पर जल छोड़ दे।

तत्पश्चात्—आचार्य, ब्रह्मा, तथा तेरह कलशों के आवाहन के लिए तेरह ऋत्विजों का वरण कर, एक तोला अथवा आधा तोला सुवर्ण की हनुमान्‌जी की प्रतिमा बनाकर, आचमन, प्राणायाम करता हुआ, हाथ में जल, पुष्प, अक्षत, द्रव्य आदि लेकर, 'अद्येत्यादि

शुद्धयर्थं पञ्चामृतस्नपनं कृत्वा, मूलमन्त्रेण शुद्धोदकस्नपनं कृत्वा, पञ्चप्रस्थपरिमित-श्वेत-तन्दुलोपरि अलङ्कृत-पूर्णकलशं संस्थाप्य, तदुपरि वस्त्रं निधाय, तदुपरि प्रतिमामाधाय प्राण-प्रतिष्ठां कृत्वा, ततस्त्रयोदशकलशान् प्रतिमावेष्टितांस्तन्दुलेषु निधाय, कलशपूजनं कृत्वा, तेषु कलशेषु वस्त्राण्यावेष्ट्य, तेषु नानाविधफलानि दत्वा, सुवर्णानि कृत्वा-ऽऽञ्जनेयपूजार्थं कलश-पूजां कृत्वा, ततः पीठार्चनं कुर्यात् ।

पीठस्याऽधस्तलाधस्तलाय नमः । वितलाय नमः । सुत-लाय नमः। रसातलाय नमः। तलाऽतलाय नमः । महातलाय नमः। पातालाय नमः । तत्राऽगाध-सर्वतोमुख-सुधाधिभ्यां नमः। तत्रकस्मैचित्कमठाय नमः। तदुपरि-सहस्रफणिफणामण्डित-मणि-प्रकाशिता-ऽशेषलोकशेषाय नमः। अष्टदिग्गजेभ्यो नमः। तदुपरि-भूमण्डलाय नमः । दिक्पालेभ्यो नमः । तन्मध्ये-मेरवे नमः । मेरोर्दक्षिणदिग्भागे कस्मैचिद्रत्नसानवे नमः। तन्मध्ये—सुरतरवे नमः । तन्मूले-सुवर्णवेदिकायै नमः। वेद्यां-वृक्षस्य पूर्वभागे-नव-

---

शुभतिथौ' से 'आञ्जनेयप्रतिमापूजां करिष्ये' पर्यन्त पढ़कर, भूमि पर जल छोड़ दे । तदनन्तर उस सुवर्ण-प्रतिमा की शुद्धि के लिए पंचामृत स्नान कराकर, मूल मन्त्र से शुद्ध जल से स्नान करता हुआ पाँच पसर चावल की ढेरी पर पूर्णपात्र सहित कलश स्थापित कर, उस कलश पर वस्त्र चढ़ाकर, उस पर स्थापित सुवर्ण-प्रतिमा का प्राण-प्रतिष्ठा कर, पश्चात् चावल की तेरह ढेरी पर, तेरह कलश स्थापित कर, उन-उन कलशों पर वस्त्र चढ़ाता हुआ अनेक प्रकार के फल आदि चढ़ाकर, भलीभाँति पूजन करे ।

रत्नखचित-नूतनपीठाय नमः । एव भावयित्वा,

स्वामिन् ! सर्वजगन्नाथ ! यावत् पूजावसानकम् ।
तावत् त्वं प्रीतिभावेन प्रतिमायां स्थिरो भव ॥

ततस्त्रयोदशग्रन्थियुक्तदोरकं प्रतिष्ठाप्य,

ध्यानम्—

वन्दे विद्युद्-वलयलसितं ब्रह्मसूत्रं दधानं
कर्णद्वन्द्वे कनकवलये कुण्डले धारयन्तम् ।
सत्कौपीनं कटिपरिहृतं कामरूपं कपीन्द्रं
नित्यं ध्यायेदनिलतनयं वज्रदेहं वरिष्ठम् ॥ १ ॥

प्रतप्त—जाम्नबूद—दिव्यभासं
देदीप्यमाना - ऽग्नि - विभासुराक्षम् ।
प्रफुल्ल - पङ्केरुह - शोभनास्यं
ध्याये हृदिस्थं पवमानसूनुम् ॥ २ ॥

अथ कल्पोक्तप्रकारेण आवाहनादि-शोडशोपचारान् कृत्वा

नमः सर्वहितार्थाय जगदाराध्यकर्मणे ।
अमेयायाऽऽञ्जनेयाय पुनरर्घ्यं पुरोऽर्पयेत् ॥ ३ ॥

तदनन्तर अंजनीनन्दन की पूजा के लिए कलश-पूजन कर पीठ पूजा करे।

'तलाय नमः' से लेकर 'प्रतिमायां स्थिरो भव' पर्यन्त पढ़कर, तत्तत्स्थानों में अक्षत, पुष्प चढ़ाकर 'स्वामिन् सर्वजगन्नाथ०' श्लोक पढ़कर तेरह ग्रन्थि वाले डोरे को प्रतिमा के साथ रख दे।

उसके बाद 'वन्दे विद्युद्वलयलसितं०' से 'ध्याये हृदिस्थं पवमान-सूनुम्' तक दो श्लोक पढ़कर ध्यान करे। उसके बाद आवाहन से लेकर षोडशोपचार से प्रतिमा एवं डोरे का पूजन कर 'नमः सर्वहितार्थाय०'

इति प्रसन्नाऽर्घ्यं समर्पयामि नमः ।

भक्त्या प्रकल्पितैरेतैरुपचारैश्च षोडशैः ।
भगवन् हनुमानीश ! प्रीयतां मे प्रियोक्तिभिः ॥ ४ ॥

उपचारसमर्पणम् ।

यस्य स्मृत्या च नामोक्त्या तपो-यज्ञ-क्रियादिषु ।
न्यूनं सम्पूर्णतां यातु सद्यो वन्दे तमच्युतम् ॥ ५ ॥

एवं रात्रौ प्रथम-यामपूजां कृत्वा, तस्यां रात्र्यां प्रतियाम्-पूजां कुर्वन् गीत-वादित्रादिभिर्मङ्गलध्वनिभिर्भागवत-पठनादि-पुराण-श्रवणादिभिर्जागरणं कृत्वा, परेद्युः प्रभाते महानद्यां ब्राह्मणैः सह स्नानं कृत्वा, नित्यकर्म विधाय, गन्धादिभिरलंकृत्य, गृह-मागत्य, पूर्ववत्पूजां कृत्वा, हनुमद्व्रतोद्यापनाङ्गहोमं कुर्यात् । क्षीरान्नेना-ऽऽज्येन पिप्पलसमिद्भिः कल्पोक्तद्रव्येण मूलमन्त्रेणा-ऽष्टोत्तरसहस्रमष्टोत्तरशतं वा होमं कुर्यात्। पूर्णाहुतिं च दत्त्वा,

---

श्लोक पढ़कर, एक आचमनी जल छोड़कर, 'भक्त्या प्रकल्पितैः०' इस श्लोक से षोडशोपचार पूजन श्री हनुमान्जी को समर्पित करता हुआ 'यस्य स्मृत्या च नामोक्त्या०' पढ़कर जल छोड़ दे ॥१-५॥

इस प्रकार रात्रि के चारों प्रहर का पूजन करता हुआ, गाना-बजाना आदि मंगलध्वनि तथा भागवत-पारायण एवं पुराण-श्रवण आदि से रात भर जाग कर दूसरे दिन प्रातःकाल वृणीत ब्राह्मणों के साथ नदी में स्नान एवं नित्य कर्म कर गन्धादि से उन ब्राह्मणों का सत्कार कर, पश्चात् सभी ब्राह्मण-मण्डली के साथ घर आकर, पूर्व की भाँति हनुमान्जी का षोडशोपचार से भली-भाँति पूजन कर, हनुमद्-व्रत उद्यापन निमित्त हवन करे। खीर, घृत, पीपल की समिधा तथा अन्य हवनीय सामग्री द्वारा मूल मन्त्र से एक हजार आठ अथवा

ब्रह्मणे दक्षिणां दत्त्वा, तत आचार्यं पूजयित्वा, प्रतिमां स-वस्त्रां सालङ्कारां स-तन्दुलां च दत्त्वा, तद्दान-साद्गुण्यार्थं दक्षिणां दत्त्वा, आचार्याय स-वत्सां सालङ्कारां पयस्विनीं गां दद्यात् ।

तत ऋत्विग्भ्यः स-वस्त्रान् कलशान् दत्त्वा दक्षिणां च दत्त्वा, विशिष्ट-पङ्गु-दीनान्ध-कृपणजनान् ब्राह्मणान् सन्तर्प्य, ऋत्विगादि ब्राह्मणाञ्छतं, पञ्चाशत्, पञ्चविंशति त्रयोदश वा ब्राह्मणान् मिष्टान्न-भोजनेन सन्तर्प्य, भूरिदानं विभवानुसारेण कुर्यात्। एवं कुर्वन् यजमानः कृतार्थो भवति। हनुमान् सुप्रीतो वरदो भूत्वा पुत्र-पौत्रादि-सर्वकामान् प्रयच्छति। इति शौनकादिकान् प्रति सूतः प्रोवाच

इति पण्डितश्रीशिवदत्तमिश्रशास्त्रिविरचिते हनुमद्-रहस्ये
हनुमद्-व्रतोद्यापनविधिः समाप्ता ।

एक सौ आठ बार हवन एवं पूर्णाहुति कर, ब्राह्मणों को दक्षिणा प्रदान करे। तत्पश्चात् आचार्य का भलीभाँति पूजन करे, वस्त्र, अलंकार, तन्दुल सहित सुवर्ण-प्रतिमा प्रदान कर, उसकी सांगता दक्षिणा देकर, बछड़ा सहित अलंकृत दूध वाली गौ प्रदान करे।

तत्पश्चात् उन वृणीत तेरह ऋत्विजों को भी वस्त्र एवं कलश तथा दक्षिणा देकर, पंगु (अपाहिज), दीन, अन्ध, कृपण तथा ब्राह्मणों को भली-भाँति मिष्टान्न आदि से अपने वैभव के अनुसार कम से कम सौ, पचास, पचीस अथवा तेरह ब्राह्मणों को भोजन करावे। इस प्रकार यदि यजमान विधि-विधान से हनुमान् जी का व्रत करता है तो वह कृतकृत्य होता है अर्थात् वह हनुमान्‌जी के द्वारा वर एवं उनकी प्रसन्नता प्राप्त कर, पुत्र-पौत्र आदि समस्त अभीष्ट सिद्धि को प्राप्त करता है। इस प्रकार सूतजी ने शौनकादि ऋषियों से कहा।

इस प्रकार पण्डित-श्रीशिवदत्तमिश्रशास्त्रिकृत 'शिवदत्ती' हिन्दी व्याख्या सहित
हनुमद्-रहस्य में हनुमद्-व्रतोद्यापन-विधि समाप्त ।

हनुमद्-व्रत-कथा

मुनयो जाह्नवीतीरे शौनकाद्या द्विजोत्तमाः ।
प्रणम्य जगतां नाथं रमानाथं मुहुर्मुहुः ॥ १ ॥
सूतं पुराणवक्तारं महाभागवतोत्तमम् ।
दृष्ट्वा प्राञ्जलयः सर्वे प्रोचुर्व्रतपरायणाः ॥ २ ॥

ऋषय ऊचुः

वासुदेवकथाप्रश्ने व्रतानि बहुशस्त्वया ।
प्रोक्तानि कृपयाऽस्माकं व्रतमन्यत् वदस्व नः ॥ ३ ॥

सूत उवाच

शृणुध्वमृषयः सर्वे मत्तः परतरं व्रतम् ।
चतुर्णामपि वर्णानां कर्तव्यं पावनोत्तमम् ॥ ४ ॥
गुह्याद् गुह्यतमं लोके मङ्गलानां च मङ्गलम् ।
आयुरारोग्यफलदं पुत्र - पौत्र - फलप्रदम् ॥ ५ ॥

कथा—एक समय परम पुनीत गंगा तट पर श्रेष्ठ शौनकादि ऋषियों ने संसार के स्वामी रमानाथ को बारम्बार प्रणाम करते हुए, परम भगवद्भक्त पुराणप्रवक्ता सूतजी को देखकर, व्रत में तत्पर समस्त ऋषिगणों ने हाथ जोड़कर सूतजी से इस प्रकार कहा-॥१-२॥

हे सूतजी ! आपने वासुदेव कथा के प्रसंग में अनेक व्रत विधि-विधान से बताया । अब हम सभी पर कृपापूर्ण दृष्टि रखते हुए किसी अन्य व्रत का विधान बताइए ? ॥ ३ ॥

सूतजी ने कहा -- मैं अब सर्वश्रेष्ठ, अतिपवित्र, चारो वर्णों (ब्राह्मण, क्षत्रिय, वैश्य, शूद्र) के करने योग्य व्रत का विधान बताता हूँ, जिसे आप लोग अत्यन्त सावधान पूर्वक श्रवण करें ॥४॥ यह व्रत परम मांगलिक एवं इस संसार में अति गुप्त, आयु, आरोग्य;

सम्पत्करं प्रतिदिनं विद्याप्रदमनुत्तमम् ।
कदाचिद् भगवान् व्यासः सह शिष्यैर्दयानिधिः ॥ ६ ॥
युधिष्ठिरं द्वैतवने द्रष्टुमभ्यागतो हठात् ।
निर्वैरं मृगसङ्कीर्णं सुपुष्पफलवृक्षकम् ॥ ७ ॥
स-पञ्चमपि काकीण - स-षड्जशिखि-सङ्कुलम् ।
श्रुता-ऽध्ययन - सम्पन्नैर्यज्वभिर्बहुवेदिभिः ॥ ८ ॥
पुत्र-पौत्रैः परिवृतैः कलितं ललितं ततम् ।
शास्त्रव्याख्यान - चतुरैर्वेदघोषोपशोभितम् ॥ ९ ॥
महाभागवतोद्गीतं लीलाहरिकथाश्रयम् ।
नित्यान्नदाननिलयं स्तुत्यं सर्वाश्रमेषु च ॥ १० ॥
सानुजं स-कलत्रं च तत्राऽपश्यद् युधिष्ठिरम् ।

ऐश्वर्यादि तथा पुत्र - पौत्रादि को भी प्रदान करने वाला, प्रतिदिन समस्त सम्पत्तिप्रदायक तथा उत्तम विद्यादायक है। किसी समय अपने शिष्यों के साथ दयासागर भगवान् व्यासजी द्वैतवन में एकाएकी युधिष्ठिर को देखने के लिए आ पहुँचे ॥ ५-६½ ॥ उस वन में परस्पर-विरोधी पशु, पक्षी आदि भी आपसी विरोध का परित्याग कर दिये थे तथा मृगों से व्याप्त, सुन्दर पुष्प, फल युक्त वृक्ष एवं कोयल के सुमधुर शब्द तथा नृत्य और षड्ज स्वर में अत्यन्त प्रसन्नता से शब्द करते हुए मयूरगणों को तथा अनेक वेदियों में हवन करते हुए, वेदशास्त्रज्ञ ऋषिगणों को भी व्यासजी ने देखा ॥ ६½-८ ॥ कहीं-कहीं पुत्र-पौत्रादि से घिरे हुए भली-भांति शास्त्रचर्चा, वेदघोष, महाभागवतोक्त हरिलीलाएँ, तो कहीं-कहीं निरन्तर अन्नदान करते हुए देखा। जो कि चारों आश्रमों (ब्रह्मचर्य, गृहस्थ, वानप्रस्थ, संन्यस्त) के लिए अत्यन्त स्तुत्य है ॥ ९-१० ॥

कृष्णद्वैपायनं सोऽपि श्रुत्वाभ्यागतमादरात् ॥११॥
अतिदूरं च निष्क्रम्य पुरस्कृत्य सहाऽनुजैः ।
एकान्तसदनं नीत्वा निविष्टं पर्यपूजयत् ॥१२॥
द्रौपदी-रचितां पूजामुररीकृत्य स द्विजैः ।
सादरं कुशलं धर्मं पप्रच्छेन्द्रं यथा गुरुः ॥१३॥

वेदव्यास उवाच

भद्रं खलु महाराज ! कुशलं खलु पार्थिव ! ।
आस्ते खलु महावीरः सुखमेव वृकोदरः ॥१४॥
धनञ्जयः सुखी चैव यमौ च सुखिनावुभौ ।
सम्पादितं पाशुपतं दिव्यमस्त्रं किरीटिना ॥१५॥

उस समय कृष्णद्वैपायन युधिष्ठिर को अपने भाई एवं पत्नीसहित व्यासजी ने देखा। जिस समय युधिष्ठिर ने भगवान् वेदव्यास का आगमन सुना, उस समय, उस स्थान से दूर जाकर अपने भाइयों के साथ एकान्त, गृह में व्यासजी को ले जाकर अत्यन्त आदरपूर्वक सिंहासन पर बैठाते हुए पूजन किया ॥ ११-१२ ॥ उस समय भगवान् वेदव्यासजी ने, द्रौपदी द्वारा पूजा को स्वीकार कर, जिस प्रकार इन्द्र से सादर कुशलता का समाचार बृहस्पति ने पूछा था, उसी प्रकार ब्राह्मणों से घिरे हुए, धर्मराज युधिष्ठिर का कुशल-समाचार अत्यन्त आदर के साथ पूछा ॥ १३ ॥

व्यासजी ने कहा — हे महाराज पृथुपुत्र युधिष्ठिर जी ! आप तथा महाबली वृकोदर (भीम) एवं धनंजय (अर्जुन) और दोनों जुड़वाँ भाई (नकुल, सहदेव) कुशल पूर्वक तो हैं ? और क्या अर्जुन ने दिव्य पाशुपतास्त्र प्राप्त किया ? ॥ १४-१५ ॥

अन्यद् गुह्याद् गुह्यतमं वदतः शृणु तन्मम ।
अस्ति व्रतं महाराज ! केवलं सम्पदालयम् ।
कृते चाऽस्मिन् व्रते शीघ्रं भवद्-राज्यागमो भवेत् ॥१६॥

धर्मपुत्र उवाच

किं नाम व्रतमाहात्म्यमैश्वर्यं तस्य कीदृशम् ? ।
देवता तत्र का प्रोक्ता को विधिः पूजनं कथम् ? ॥१७॥
कस्मिन् मासे च कैः पूर्वं व्रतमाचरितं प्रभो ! ? ।
इदानीमेव तत्कुर्यां यदि शीघ्रफलप्रदम् ॥१८॥
इत्थं त्वयाऽतिदुःखार्ते कृपा चेन्मयि सानुजे ।
भवादृशानां महतां बान्धवो नाऽपरः क्वचित् ॥१९॥
युधिष्ठिरेण स मुनिः स-विश्वासमुदीरितः ।
प्रत्युवाच स्मरंश्चित्ते हनुमन्तं मुहुर्मुहुः ॥२०॥

हे महाराज ! सम्पत्ति का निधिस्वरूप अत्यन्त गुप्त एक व्रत का मैं निरूपण करता हूँ, जिसे आप सावधान-पुरस्सर सुनिए। इस व्रत को करने पर निश्चित ही नष्ट राज्य शीघ्र प्राप्त होता है ॥ १६ ॥

युधिष्ठिर ने कहा कि हे प्रभो ! इस व्रत का नाम, माहात्म्य, ऐश्वर्य, देवता एवं विधि तथा पूजन किस प्रकार किया जाता है, तथा किस मास में यह व्रत करना चाहिए, यह बताने की कृपा कीजिए, साथ-ही-साथ यह भी निरूपण करिए कि इस व्रत को पूर्व में किसने किया था ? यदि आपके कथनानुसार यह व्रत शीघ्र फलदायक है, तो क्या मैं इसी समय इस व्रत को करूँ ? कारण कि भाई सहित मैं अत्यन्त दुःखी हूँ, अतः आपकी मुझ पर विशेष अनुकम्पा है, और आप-जैसा हितचिन्तक मेरा और कोई नहीं है। इस प्रकार युधिष्ठिर ने अत्यन्त विश्वासपूर्वक भगवान् वेदव्यासजी

व्यास उवाच

शृणु राजेन्द्र ! तन्नाम हनुमद्-व्रतमद्भुतम् ।
उच्चारणादेव तस्य कार्यसिद्धिर्न संशयः ॥२१॥
दुष्टग्रहोच्चाटनं च महाज्वरनिवारणम् ।
अलं हि बहुभिर्वाक्यैरभीष्टदमिति स्मृतम् ॥२२॥
पुरा हि भगवान् कृष्णः पाञ्चाल्या प्रार्थितो भृशम् ।
आचचक्षे व्रतमिदं सविशेषं हनूमतः ॥२३॥
तत्प्रभावादेव लब्धास्त्वया परमसम्पदः ।
कदाचिदपि पाञ्चाल्याः कण्ठस्थं व्रतदोरकम् ॥२४॥
दृष्ट्वा धनञ्जयः प्राह किमेतद्-व्रतमित्यलम् ।
साऽऽचचक्षे सुमधुरं व्रतागमनमुत्तमम् ॥२५॥

से कहा। तत्पश्चात् अपने चित्त में श्री हनुमान्जी का बारम्बार स्मरण करते हुए व्यासजी ने इस प्रकार कहा— ॥ १७-२० ॥

हे राजेन्द्र युधिष्ठिर ! अत्यन्त प्रभावशाली यह हनुमद्-व्रत है, जिसका नाम-स्मरण से ही निःसन्देह समस्त कार्य सिद्ध होते हैं। तथा दुष्ट ग्रह विनाशक एवं ज्वरादि को नष्ट करने वाला यह व्रत है। इस के विषय में बहुत कुछ कहना तो व्यर्थ ही है। आप इतना ही समझ लीजिए कि यह व्रत समस्त अभीष्ट कार्य को सिद्ध करने वाला है ॥ २१-२२ ॥ पूर्व समय में पांचाली द्रौपदी द्वारा अत्यन्त प्रार्थना करने पर इस हनुमद्-व्रत का निरूपण भगवान् कृष्ण ने किया था ॥ २३ ॥ उसी व्रत के प्रभाव से तुम ने समस्त सम्पत्तियाँ प्राप्त की थी। किसी समय हनुमद्व्रत के डोरे को द्रौपदी को कण्ठ में देखकर धनंजय ने कहा कि यह व्यर्थ (बेकार) का डोरा गले में क्यों बाँध रखा है ? तत्पश्चात् द्रौपदी ने मधुर वचनों से हनुमद्-व्रत का यह उत्तम डोरा मैंने बाँध रखा है, इस प्रकार कहा

श्रुत्वैतद् दैववशगः पार्थः क्रोधसमागतः ।
प्राह वै परुषं वाक्यं सोच्चैश्वर्यातिगर्वितः ॥२६॥
ध्वजे मम निबद्धोऽयं वानरो नियतं मया ।
किं दास्यति मम ब्रूहि वटुर्वन्याशनो मृगः ॥२७॥
तिर्यग्-जन्मपराधीनो योषितो बुद्धिरीदृशी ।
एतादृशैर्व्रतैरस्मान्न वञ्चयितुमर्हसि ॥२८॥
इत्युक्ता साऽतिदुःखार्ता प्राह तथ्यं धनञ्जयम् ।
भो राजन्! सुकुमारेण आख्यातं मम सुप्रियम् ॥२९॥
जगन्नाथेन कृष्णेन तथा तस्मान् मया धृतम् ।

अर्जुन उवाच

दुःशीले छद्मना तुभ्यं तेन हास्यात् समीरितम् ॥३०॥

॥ २४-२५ ॥ इस प्रकार द्रौपदी के वाक्य को सुनकर दैववशात् अपने ऐश्वर्याभिमान में चूर, अत्यन्त क्रुद्ध होते हुए अर्जुन ने अति कठोर वाक्य द्रौपदी से श्री हनुमान्‌जी के विषय में कहा कि अरे ! ये बन्दर तो निरन्तर हमारे रथ की ध्वजा पर लटका हुआ है । यह तुम्हीं बताओ कि क्या शाखामृग, जंगली फलों को खानेवाला, वानर समस्त सम्पत्ति प्रदान करा सकता है ? । कारण कि स्त्रियों की बुद्धि तो वानर आदि तिर्यग्योनियों के अधीन है । अतः तुम इस प्रकार के व्रतों से मुझे ठग नहीं सकती । इस प्रकार अर्जुन के कहने पर अत्यन्त दुःखी होती हुई द्रौपदी ने पुनः अर्जुन से सच्ची बातें इस प्रकार कही कि हे राजन् ! इस व्रत का विधान मुझ से जगन्नाथ भगवान् कृष्ण ने बताया था । उनके कथनानुसार ही मैंने इस डोरे को धारण किया । इस प्रकार द्रौपदी के वाक्य को सुनकर अर्जुन ने कहा—अरी दुष्टे ! उस कपटी कृष्ण ने तुमको ठग लिया और हँसी-मजाक में तुम से इस प्रकार व्रत एवं डोरा बाँधने के

मन्निबद्धस्य तस्यैव मदधीनस्य दासवत् ।
पूजा तेन कथं प्रोक्ता दुष्टचित्तेन विष्णुना ॥३१॥
पतिव्रता न च त्वं वै पतिवाक्यपरायणा ।
त्याज्यं तद्दोरकं ते तु व्रताङ्गव्रतमप्युत ॥३२॥
इतीरितेयं सन्त्रस्ता पतित्वात् पतिदेवता ।
त्यक्त्वा तु दोरकं तत्र न्यस्तं चोद्यानमध्यमे ॥३३॥
ततः सकलसम्पत्तिर्यथागतमगात्तदा ।
भवद्भिरीदृशं प्राप्तमायासाद् वनसेवनम् ॥३४॥
त्रयोदशग्रन्थियुक्त - दोरस्योल्लङ्घनेन वै ।
भोक्तव्यं तत्फलं सौख्यं वत्सरैश्च त्रयोदशैः ।

लिए कहा ॥२६-३०॥ मेरे द्वारा ही अधीन वह कृष्ण सेवक के समान है, तो भला अत्यन्त दुष्ट कृष्ण ने हनुमानजी की पूजा करने के लिए तुम से किस प्रकार कहा ?। तुम तो अति पतिव्रता, सती-साध्वी हो, अतः तुम्हारे लिए पति के वाक्य का परित्याग करना उचित नहीं, एतदर्थ इस हनुमद्-व्रत के अंगभूत धारण किये हुए इस डोरे का तुम अति शीघ्र परित्याग कर दो। इस प्रकार पतिदेव अर्जुन के कहने पर भयभीत होती हुई द्रौपदी ने उस डोरे को कण्ठ से उतार कर फेंक तो नहीं दिया, अपितु बगीचे के मध्य सुरक्षित रख दिया ॥ ३१-३३ ॥

हे युधिष्ठिर ! इस प्रकार अर्जुन द्वारा आज्ञा प्राप्त होने से उस डोरे को अपने कण्ठ से निकाल देने के कारण ही आपने अनायास वन-वास प्राप्त किया और आपको समस्त सम्पत्ति जिस प्रकार एकाएकी प्राप्त हुई थी उसी प्रकार सहसा नष्ट हुई ॥ ३४ ॥ तेरह ग्रन्थियुक्त इस डोरे का अपमान करने से ही तेरह वर्ष पर्यन्त वनवास भुगतना

इत्येतत् सकलं श्रुत्वा कृष्णा सस्मार तद्व्रतम् ॥३५॥
सत्यमित्याह सर्वेषां पतीनां पुरतस्तदा ।

व्यास उवाच

अपरं श्रोतुमिच्छामि चेतिहासं वदामि ते ।
पुरा हि राघवः सीतां द्रष्टुकामः स-लक्ष्मणः ॥३६॥
ऋष्यमूकमुपागम्य हनुमन्तं ददर्श ह ।
स-सुग्रीवेण तेनाऽसौ रामः सख्यं चकार ह ॥३७॥

हनुमान् उवाच

राम राम महाबाहो ! यद् वक्ष्ये श्रृणु तद्वचः ।
भक्तस्य तव मे राम कार्यातुरवशेरितः ॥३८॥
अहं पुरा मघवता वज्रेण हनुताडितः ।

पड़ा। यदि इसे धारण किये होते तो तेरह वर्ष पर्यन्त अवश्यमेव सुख का उपभोग करते। इस प्रकार व्यास जी की बात को सुनकर द्रौपदी को उस व्रत का स्मरण हो आया और उस समय अपने पाँचों पतियों के आगे द्रौपदी ने कहा कि भगवान् व्यासजी ने उक्त बात सत्य ही कही ॥३५½॥ पुनः व्यासजी ने कहा — हे युधिष्ठिर ! इस हनुमद्-व्रत-विषयक कथा श्रवण करने की तुम्हारी इच्छा हो तो मैं और भी एक इतिहास कहता हूँ उसे सावधान पूर्वक श्रवण करो। एक समय लक्ष्मण के साथ मर्यादा पुरुषोत्तम भगवान् रामचन्द्र सीता की खोज करते हुए जिस समय ऋष्यमूक पर्वत पर आये, उस समय वानरराज सुग्रीव के साथ हनुमान् को देखा। और राम के साथ हनुमान् ने मित्रता की ॥ ३५½-३७ ॥

हनुमान्जी ने कहा—हे महाबाहु राम ! मैं जो बात कहूँगा उसे आप सावधान पूर्वक श्रवण करें, क्योंकि वास्तविक में तो मैं आपके कार्य करने में अत्यन्त आतुर एवं परम भक्त हूँ। किसी

तदाप्रभृति हनुमानिति ख्यातोऽस्मि भूतले।
तदा मां मूर्च्छितं दृष्ट्वा पिता मे वायुरब्रवीत् ॥३९॥
यतो निपातितः पुत्र इति क्रुद्धस्तिरोदधे।
तदा ब्रह्मादयो देवा साक्षाद् भूत्वा वदन्ति ह।
आञ्जनेय ! चिरंजीव त्वममेय-पराक्रमः ॥४०॥

अशेष-रामकार्याणि साधय त्वं कपीश्वर !।
वायुपुत्र ! प्लवङ्गेश ! हनुमद्व्रतनायकम् ॥४१॥
तद्यश्चकार विमलं भृशं प्रियतमोऽद्भुतम्।
तस्य सर्वाणि कार्याणि सिध्यन्तीति वरं ददुः ॥४२॥
कार्यार्थिना राघवेण कृतमित्यब्रवीच्च माम्।
स्मृतं तद् वै राम वाक्यं कुरु स्वामिन् मयेरितम् ॥४३॥

समय देवराज इन्द्र ने मेरी हनु (दाढ़ी) पर वज्र का प्रहार किया, तभी से तो इस लोक में मैं 'हनुमान्' इस नाम से प्रसिद्ध हुआ। जिस समय मैं इन्द्र के वज्र-प्रहार द्वारा मूर्च्छित हुआ था, उस समय मेरे पिता वायु मुझे मूर्च्छित देखकर इस प्रकार कहने लगे कि, जिसने मेरे पुत्र को मारा है उसे मैं भी अवश्य नष्ट करूँगा। इस प्रकार क्रुद्ध होते हुए अन्तर्ध्यान हो गये। उस समय समस्त ब्रह्मादि देवगण उस स्थान पर प्रकट होकर इस प्रकार कहने लगे कि हे अंजनिनन्दन ! तुम अमित पराक्रमी बनो और इस बज्र का प्रहार व्यर्थ हो, तथा चिरंजीव हो और हे कपीश्वर वानरराज ! वायुपुत्र ! तुम अपने व्रत के आज से नायक होते हुए राम के समस्त कार्य को सिद्ध करो ॥३८–४१ ॥ और उन समस्त देवगणों ने इस प्रकार वरदान भी दिया कि तुम्हारे इस पुनीत व्रत को जो करेगा उसके समस्त मनोरथ निश्चय ही सिद्ध होंगे। और भी कहा कि इस व्रत को

न मन्तव्यं वृथा नाथ ! सत्यं मन्तव्यमीश्वर ! ।
रोचते यदि त्वच्चित्ते तत्कुरुष्वार्थसिद्धये ॥४४॥
इत्युक्त्वा संस्थिते तस्मिन् तदा संक्रमते हठात् ।
आकाशवाणी तत्रोच्चैर्यदुक्तं सत्यमेव तत् ॥४५॥
इति रामः प्रसन्नश्च श्रुत्वा गगनभाषितम् ।
चिकीर्षया व्रतस्याऽस्य हनुमन्तमथाऽब्रवीत् ॥४६॥
हनुमन् ! को विधिस्तस्य कदा कर्तव्यमेव तत् ? ।
ब्रूहीति वचनं श्रुत्वा प्रत्युवाच मरुत्सुतः ॥४७॥
मार्गशीर्षे सिते पक्षे त्रयोदश्यां जयप्रदे ।
अभिजिन्निकटे काले त्रयोदशघटीयुते ॥४८॥
त्रयोदशग्रन्थियुतं दोरकं कलशे स्थितम् ।

कार्यार्थी राघव ने भी किया था । अतः हे स्वामी ! देवताओं ने मुझसे पहले ही कहा है कि तुम राम के समस्त कार्य सिद्ध करो । हे नाथ ! इस व्रत को आप व्यर्थ न समझें, अपितु सत्य ही मानें । हे प्रभु ! यदि आपके मन में अपनी कार्यसिद्धि अभीष्ट हो तो आप इस व्रत को अवश्य कीजिए । हनुमान्‌जी के इस प्रकार कहने के पश्चात् उच्च स्वर से आकाश वाणी हुई कि 'हनुमान जी ने जो भी कहा वह सत्य है ।' ऐसी आकाशवाणी सुन भगवान् राम ने अत्यन्त प्रसन्न हो इस व्रत को करने की इच्छा से पुनः हनुमान् जी से इस प्रकार कहा ॥४२-४६॥ हे हनुमान् ! इस व्रत का विधान तथा किस समय इस व्रत को करना चाहिये इसे बताने की कृपा करें । भगवान् राम के उपर्युक्त वचन को सुनकर मारुतिनन्दन हनुमान् ने इस प्रकार कहा ॥ ४७ ॥ मार्गशीर्ष (अगहन) शुक्लपक्ष त्रयोदशी यदि तेरह घड़ी युक्त हो तथा शुभकारी अभिजित् नक्षत्र

हरिद्राभं ततस्तत्र मामावाह्य प्रपूजयेत् ॥४६॥
पीतगन्धं पीतपुष्पं पीतद्रव्यं विशेषतः ।
'नमो भगवते वायुनन्दनाये'ति मन्त्रतः ॥५०॥
ॐकारेणाऽनेन पूजां कुर्यात् षोडशयत्नतः ।
सोपचारं ब्राह्मणाय दद्याद् वायनमुत्तमम् ॥५१॥
त्रयोदशाऽपूपमात्रं गोधूमान्नं प्रदापयेत् ।
स-दक्षिणं स-ताम्बूलं ब्राह्मणान् भोजयेत् तदा ॥५२॥
प्रारम्भे त्वस्य कार्याणि सिद्ध्यन्त्येव न संशयः ।
तावत् कर्तव्यमेतद् वै यत्नतश्च त्रयोदश ॥५३॥
उद्यापनं यथान्यायं कुर्यात् कलशवस्त्रकैः ।
सम्पूर्णमपि चेत्युक्तमित्युक्त्वा विरराम ह ॥५४॥
रामोऽपि सह सुग्रीवः सानुजस्तच्चकार ह ।

भी हो, तो उस दिन तेरह गाँठ युक्त पीले डोरे को कलश में रखकर 'ॐ नमो भगवते वायुनन्दनाय' इस मन्त्र से आवाहन कर, पीले गन्ध, पुष्प एवं अन्यान्य पूजन सामग्री से मेरा पूजन करे ॥ ४८-५० ॥

साधक को चाहिए कि ॐकार पूर्वक मन्त्र द्वारा षोडशोपचार से पूजन करे। गेहूँ के आटे का तथा तेरह मालपूआ, ताम्बूल, और दक्षिणा सहित वायन (छितनी) में रखकर ब्राह्मण को दे, एवं यथेष्ट भोजन भी करावे ॥ ५१-५२ ॥ हनुमद्व्रत के आरम्भ में इस प्रकार करने से निःसन्देह साधक के समस्त कार्य सिद्ध होते हैं। जब तक तेरह वर्ष पूर्ण न हो तबतक इस व्रत को प्रयत्न पूर्वक करे। तेरह वर्ष के बाद कलश, वस्त्र आदि द्वारा विधि-विधान से इस व्रत के उद्यापन करने से यह व्रत पूर्ण होता है। इस प्रकार हनुमान् जी ने भगवान् रामचन्द्र से कहा ॥ ५३-५४ ॥ लक्ष्मण, विभीषण

कार्यसिद्धिरभूत्तस्य सुग्रीवश्च विभीषणः ॥५५॥
विभीषणादि-रामोक्तं व्रतं कृत्वा यथोदितम् ।
तदाप्रभृति लोकेऽस्मिन् विश्रुतं हनुमद्व्रतम् ॥५६॥
भवेत् सहायो हनुमान् कृते तस्य व्रते शुभे ।
तस्मात् त्वयाऽपि कर्त्तव्यं व्रतमेतन्नृपोत्तम ! ॥५७॥
मासानां मार्गशीर्षोऽहमित्युक्तं स्वामिना स्वयम् ।
तस्मात्त्वमपि तत्कृत्वा लब्धराज्यो भविष्यसि ॥५८॥
इत्याकर्ण्य वचस्तस्य सर्वेऽपि मुदमाययुः ।
अथ सायमभूत्तत्र सूर्ये [1]वाराशिमागते ॥५९॥
नीत्वा रात्रिं ततः प्रात उत्थाय तपसः सुतः ।
व्यासस्य पुरतश्चक्रे व्रतमेतत् सुविस्तरम् ॥६०॥

एवं सुग्रीव के साथ राम ने भी इस व्रत को किया, जिससे उन सभी की कार्य-सिद्धि हुई ॥ ५५ ॥ जब से विभीषण और राम आदि ने इस व्रत को किया तभी से इस लोक में इस व्रत का प्रचार हुआ ॥ ५६ ॥ हे युधिष्ठिर ! इस व्रत के करने वाले प्राणी की सहायता हनुमान्‌जी स्वयं करते हैं। अतः यह व्रत तुम्हें भी अवश्य करना चाहिए ॥५७॥ भगवान् ने गीता में 'मासानां मार्गशीर्षोऽहं' कहकर इस मास की विशिष्टता स्वयं प्रकट की है, अतः इसी मास में यदि तुम भी इस व्रत को करो तो निश्चित ही नष्ट राज्य तुम्हें पुनः प्राप्त हो जायेगा ॥ ५८ ॥

इस प्रकार व्यासजी के वाक्य को सुनकर युधिष्ठिर आदि समस्त ऋषिगण अतीव हर्षित हुए। तत्पश्चात् सभी लोगों ने समुद्र तट पर सायं काल में पहुँचकर वहाँ रात्रि व्यतीत की। उसके बाद प्रातः

---

१. वाराशि=जलराशि, समुद्रमित्यर्थः ।

उद्यापनं तथा होमः स-घृतं पायसैः शुभैः ।
मूलमन्त्रोक्तसूक्तेन व्रताङ्गमकरोत्ततः ॥६१॥
साक्षाद्धनुमतः पूजा पाञ्चाल्या सह कल्पिता ।
अथ संवत्सरेऽतीते पाण्डवो राज्यमाप्नुयौ ॥६२॥
तस्मात् कुरुध्वं मुनयो व्रतानामुत्तमं व्रतम् ।
इति कृत्वा भवन्तश्च प्राप्ताभीष्टमनोरथाः ॥६३॥
तेऽपि चक्रुर्यथान्यायं व्रतमेतत् सुमङ्गलम् ।
इति श्रीहनुमत्कल्पं लिखितं यस्य वेश्मनि ॥६४॥
कृते व्रते च यत्पुण्यं तत्पुण्यफलमश्नुते ।
पठते यो हनुमतः कल्पं यः श्रृणुयान्नरः ॥६५॥
वाचयेद् यस्तु सद्भक्त्या स सम्पूर्णमनोरथः ।

काल उठकर धर्मराजपुत्र युधिष्ठिर ने व्यासजी के समक्ष यह व्रत तथा पायस, घृतयुक्त हवि आदि से होम करते हुए मूलमन्त्र 'ॐ नमो भगवते वायुनन्दनाय' द्वारा व्रत के अंगभूत हनुमान्जी का पूजन एवं उद्यापन, द्रौपदी के साथ किया। इस प्रकार इस व्रत के करने से वर्ष के भीतर ही युधिष्ठिर ने अपना राज्य पुनः प्राप्त किया ॥ ५९-६२ ॥ हे ऋषिगण ! आप सभी इस उत्तम व्रत को करें जिस व्रत को करने से आप सभी के अभीष्ट-मनोरथ सिद्ध होंगे। पश्चात् उन महर्षियों ने भी विधि-विधान से परम मांगलिक इस हनुमद्व्रत को किया।

हे ऋषिगण ! जिसके घर में यह हनुमत्कल्प ग्रन्थ रहता है, उसको वही समस्त पुण्य फल प्राप्त होता है, जो कि इस व्रत को करने वाले पुण्यफल प्राप्त करते हैं। जो इस हनुमत्कल्प का पाठ करता है, तथा श्रवण करता है या अत्यन्त श्रद्धा-भक्ति पूर्वक सुनाता है, उन सभी के समस्त मनोरथ पूर्ण होते हैं ॥ ६३-६५½ ॥

फलश्रुतिः

वेदविद्-ब्राह्मणः श्रीमान् क्षत्रियोऽमितविक्रमः ॥६६॥
वैश्योऽपि च धनाध्यक्षः शूद्रः कृषिमहाधनः ।
रोगार्तो मुच्यते रोगात् सुतार्थी लभते सुतान् ॥६७॥
मोक्षार्थी लभते मोक्षं धनार्थी लभते धनम् ।
इदं व्रतं नरः कृत्वा साङ्गोपाङ्गं हनूमतः ॥६८॥
'ॐ नमो भगवते वायुनन्दनाये'ति मन्त्रतः ॥६९॥
अभिमन्त्र्य त्रिवारं यो गन्धं हस्तेन लेपयेत् ।
ललाटे धारयेद् यस्तु तस्य लोको वशी भवेत् ॥७०॥
धृत्वा ललाटे तिलकं यो राजगृहमन्वगात् ।
नृपतिस्तस्य वशगः प्रत्यहं जायते ध्रुवम् ॥७१॥
हनूमन्तं स्मरन् नाम प्रयाणं यदि गच्छति ।

फलश्रुति—इस व्रत को करने वाले ब्राह्मण वेदज्ञ, क्षत्रिय, श्रीमान् तथा अतुल पराक्रमी, वैश्य कुवेर के समान धनवान् एवं शूद्र बहुत बड़ा धनी एवं खेती वाला होता है। उसी प्रकार रोग पीड़ित प्राणी रोग से मुक्त होता है, तथा पुत्रार्थी पुत्र प्राप्त करता है और मोक्षार्थी मोक्ष एवं धनार्थी धन को प्राप्त करता है। सांगोपांग हनुमान् का पूजन कर, 'ॐ नमो भगवते वायुनन्दनाय' इस मन्त्र से तीन बार अभिमन्त्रित गन्ध को हाथ से जो मनुष्य अपने मस्तक पर लगाता है उस मनुष्य के वश में सभी लोग हो जाते हैं ॥ ६५३–७० ॥

जो मनुष्य इस प्रकार अपने ललाट में तिलक लगाकर राजगृह में जाता है उसको देखकर राजा उसके वश में अवश्य हो जाता है ॥७१॥ इसी प्रकार जो व्यक्ति घर से निकलते समय हनुमान्जी

सर्वत्र विजयी भूत्वा पुनरागच्छति ध्रुवम् ॥७२॥
हनुमद्कल्पमेतत् तु भक्तियुक्तः करोति यः।
राजद्वारे च युद्धे च सभायां व्यावहारिके ॥७३॥
हुताशने च पवने व्याघ्र-सिंहभयेषु च।
समस्तकार्योद्योगे च सर्वत्र विजयी भवेत् ॥७४॥
त्रयोदशग्रन्थियुक्तं व्रतदोरं हनूमतः।
धारयेद् यः कण्ठमूले दक्षिणेऽप्यथवा करे ॥७५॥
तस्य सर्वाऽभीष्टसिद्धिर्भवत्येव न संशयः।
ब्राह्मण-क्षत्रिय-विशां शूद्रादीनां च सर्वशः ॥७६॥
व्रतं सम्पत्करं शीघ्रं स्त्रीणां चैव विशेषतः।
सत्यं सत्यं पुनः सत्यं व्रतमेतद् विधानतः ॥७७॥

नमस्ते नमस्ते महावायुसूनो !
नमस्ते नमस्ते भविष्यद्विधातः।

का स्मरण कर जाता है वह निश्चय ही विजय प्राप्त कर पुनः लौट आता है ॥७२॥ जो इस हनुमत् कल्प का श्रद्धा-भक्ति से पाठ करता है वह राजद्वार, युद्ध, सभा, व्यवहार, अग्नि, आँधी, व्याघ्र तथा सिंह आदि के भय एवं समस्त कार्य और उद्योग में विजयी होता है ॥ ७३-७४ ॥ तेरह गाँठ वाले हनुमद्व्रत के डोरे को कण्ठ अथवा दाहिने हाथ में जो मनुष्य धारण करता है, उसकी निःसन्देह समस्त अभीष्ट सिद्धि प्राप्त होती है। ब्राह्मण, क्षत्रिय, वैश्य, शूद्र तथा विशेषकर स्त्रियों के लिए यह हनूमद्व्रत समस्त सम्पत्ति को तत्क्षण देने वाला है। इस व्रत को जो भी विधि-विधान पूर्वक करता है। उसके समस्त कार्य सत्य (निश्चित) ही सिद्ध होते हैं॥७५-७७॥ हे वायुपुत्र ! भविष्य के निर्माण करने वाले, अपने भक्तों को

नमस्ते नमस्ते सदाऽभीष्टदात-
नमस्ते नमस्तेऽनिशं रामभक्त ! ॥७८॥

इति पण्डितश्रीशिवदत्तमिश्रशास्त्रिकृत-हनुमद्-रहस्ये भविष्योत्तर-
पुराणे व्यासप्रोक्त-हनुमद्-व्रतकथा समाप्ता ।

*

हनुमल्लक्ष-प्रदक्षिणा-विधानम्

युधिष्ठिर उवाच

भगवन् ! ज्ञानिनां श्रेष्ठ ! सर्वविद्याविशारद ! ।
किञ्चिद् विज्ञप्तुमिच्छामि वक्तुमर्हस्यशेषतः ॥ १ ॥
अज्ञानादथवा ज्ञानात् प्रमादाद् वा कृतानि हि ।
पापानि सुबहून्यत्र विलयं यान्ति तद् वद ? ॥ २ ॥

व्यास उवाच

लक्षप्रदक्षिणा कार्या गो-ऽग्नि-द्विज-हनूमताम् ।
पृच्छते नारदायेति प्राह ब्रह्मा शृणुष्व तत् ॥ ३ ॥

अभीष्ट वर प्रदान करने वाले, तथा निरन्तर राम की सेवा में तत्पर ऐसे आप को बारम्बार नमस्कार है ॥७८॥

इस प्रकार पण्डित श्रीशिवदत्तमिश्रशास्त्रिकृत हिन्दी व्याख्या सहित हनुमद्-रहस्य में भविष्योत्तरपुराणस्थित व्यासविरचित हनुमद्-व्रत-कथा समाप्त ।

*

नारद उवाच

ये च पापरता नित्यं धर्माऽधर्म-विवर्जिताः ।
व्रतहीना दुराचारा ज्ञानहीनाश्च जन्तवः ॥ ४ ॥
तेषां पापविनाशार्थं प्रायश्चित्तं कथं भवेत् ? ।

ब्रह्मोवाच

किं वर्णयामि साधूनां माहात्म्यं च भवादृशाम् ॥ ५ ॥
साधु साधु च विप्रेन्द्र ! वच्मि ते व्रतमुत्तमम् ।
ब्रह्महत्यादिपापेषु सङ्कुलीकरणेषु च ॥ ६ ॥
जातिभ्रंशकरे वाऽपि अभक्ष्यभक्षणे तथा ।
विष्णुना निर्मितं पूर्वं व्रतं लक्षप्रदक्षिणम् ॥ ७ ॥
सर्वेषामपि पापानां नाशकं परमं शुभम् ।
आषाढे शुक्लपक्षे तु एकादश्यां विशेषतः ॥ ८ ॥
द्वादश्यां पौर्णमास्यां वा प्रारभेद् व्रतमुत्तमम् ।
देशकालौ तु सङ्कीर्त्य नत्वा गुरु-विनायकौ ॥ ९ ॥
लक्षप्रदक्षिणाः कार्या स्त्रीनग्नींश्च शुचिव्रत ।
जितेन्द्रियो जितप्राणो मुखेन मनुमुच्चरेत् ॥१०॥
नमस्ते गार्हपत्याय नमस्ते दक्षिणाग्नये ।
नम आहवनीयाय महावेद्यै नमो नमः ॥११॥
गवां प्रदक्षिणाः कार्या लक्षसंख्या यथाविधि ।
पूर्वं पूज्य च गामेकां दत्वा नैवेद्यमुत्तमम् ॥१२॥
पश्चात् प्रदक्षिणाः कार्या नत्वा तां च पुनः पुनः ।
गवामङ्गेषु तिष्ठन्ति भुवनानि चतुर्दश ॥१३॥

यस्मात्तस्माच्छिवं मे स्यादिह लोके परत्र च ।
एवं प्रदक्षिणाः कृत्वा सर्वपापैः प्रमुच्यते ॥१४॥
कर्मनिष्ठं शुचिं विप्रं पूजयेद् विधिवद् बुधः ।
ततः प्रदक्षिणाः कार्या यावल्लक्षं भवेद् व्रती ॥१५॥
भूमिदेव ! नमस्तुभ्यं नमस्ते ब्रह्मरूपिणे ।
पूजितो देवदैत्यैस्त्वमतः शान्तिं प्रयच्छ मे ॥१६॥
एवं हनुमते कार्या भूत-प्रेतविनाशिने ।
षोडशैरुपचारैश्च पूजयेद् वायुनन्दनम् ॥१७॥
ततः प्रदक्षिणाः कुर्यादात्मकार्यार्थसिद्धये ॥१८॥
मनोजवं मारुततुल्यवेगं जितेन्द्रियं बुद्धिमतां वरिष्ठम् ।
वातात्मजं वानरयूथमुख्यं श्रीरामदूतं शरणं प्रपद्ये ॥१९॥
एवं प्रदक्षिणावर्तं कुर्याद् देवं प्रयत्नतः ।
भूत-प्रेत-पिशाचाद्या विनश्यन्ति न संशयः ॥२०॥
आदित्यादिग्रहाः सर्वे शान्ति यान्ति शिवाज्ञया ।
उद्यापनं च सर्वासां कुर्यात् पूर्णफलाप्तये ॥२१॥
उद्यापनविधानादौ पुण्याहं वाचयेत्ततः ।
आचार्यं वरयित्वा च प्रतिमाः स्वर्णसम्भवाः ॥२२॥
अवर्णं कलशं पूर्णं स्थापयेन्मण्डले शुभे ।
विरच्य लिङ्गतोभद्रं पूजयेद् देवमञ्जसा ॥२३॥
पायसं जुहुयात्तत्र तत्तन्मन्त्रैर्विचक्षणः ।
अष्टोत्तरसहस्रं तु प्रायश्चित्तं चरेच्छुभम् ॥२४॥

मण्डलं दक्षिणायुक्तमाचार्याय निवेदयेत् ।
ब्राह्मणान् भोजयेच्छक्त्या वित्तशाठ्यविवर्जितः ॥२५॥
ये कुर्वन्ति व्रतमिदं पापमुक्ता भवन्ति ते ।
भुक्त्वा यथेप्सितान् भोगानन्ते सायुज्यमाप्नुयुः ॥२६॥

अथ प्रयोगः

'देशकालौ स्मृत्वा मम भूत-प्रेत-पिशाचादि-बाधा-परिहार-द्वारा आदित्यादि-नवग्रहशान्ति-द्वारा वा श्रीमन्महारुद्रहनुमत्प्रीत्यर्थममुकसंख्याप्रदक्षिणां करिष्ये, इति संकल्प्य, षोडशोपचारैर्हनुमन्तं पूजयित्वा प्रदक्षिणाः कार्याः ।

तत्र मन्त्रः

मनोजवं मारुततुल्यवेगं जितेन्द्रियं बुद्धिमतां वरिष्ठम् ।
वातात्मजं वानरयूथमुख्यं श्रीरामदूतं शरणं प्रपद्ये ॥

इति मन्त्रं पठन् प्रदक्षिणाः प्रतिदिनं नियमानुसारं कृत्वा उत्तरपूजां कृत्वा प्रार्थयेत् ।

अन्यथा शरणं नास्ति त्वमेव शरणं मम ।
तस्मात् कारुण्यभावेन रक्ष मां परमेश्वर ! ॥ १ ॥
मन्त्रहीनं क्रियाहीनं भक्तिहीनं सुरेश्वर ! ।
यत्पूजितं मया देव ! परिपूर्णं तदस्तु मे ॥ २ ॥

इति क्षमाप्य अनेनाऽमुकसंख्याप्रदक्षिणाख्येन कर्मणा श्रीहनुमद्देवता प्रीयताम् ।

इति हनुमद्-रहस्ये बृहज्ज्योतिषार्णवस्थ-हनुमदुपासनाध्याये
लक्षप्रदक्षिणाविधानं समाप्तम् ।

*

हनुमद्-दीपदान-विधिः

उक्तं च सुदर्शनसंहितायाम्--

अथाऽतः संप्रवक्ष्यामि दीपदानं हनूमतः।
येन विज्ञानमात्रेण सिद्धो भवति साधकः ॥ १ ॥
दीपदानप्रमाणं तु सावधानादिदं शृणु।
प्रमाणं तं तु वक्ष्यामि पञ्चमानमनुक्रमात् ॥ २ ॥
स्थानं भेदं च मन्त्रं च दीपदाने मनुं पृथक्।
पुष्पवासिततैलं च सर्वकामफलप्रदम् ॥ ३ ॥
तिलतैलं श्रियो हेतुः पथिकागमनाय च।
अतसीतैलमुद्दिष्टं यशःकर्मणि निश्चितम् ॥ ४ ॥
सार्षपं रोगनाशाय सर्वव्याधिविनाशकम्।
मारणे राजिकाजातं तथा वैभीतकादिकम् ॥ ५ ॥
उच्चाटे च करञ्जोत्थं विद्वेषे मधुवृक्षजम्।
अलाभे सर्वतैलं च तिलतैलमनुत्तमम् ॥ ६ ॥
गोधूमं च तिलं माषं मुद्गं वै तण्डुलं क्रमात्।
पञ्चधान्यमिदं प्रोक्तं नित्यं दीप उदाहृतम् ॥ ७ ॥
पञ्चधान्यसमुद्भूत-पिष्टपात्रं सुशोभनम्।
संकाममिदं प्रोक्तं सर्वदा दीपदापने ॥ ८ ॥
वश्ये तण्डुलपिष्टं च मारणे माषपिष्टकम्।
उच्चाटने तिलं कृष्णं यवपिष्टं प्रकीर्तितम् ॥ ९ ॥
पान्थस्यागमने प्रोक्तं गोधूमोत्थं स-तण्डुलम्।
मोहने तण्डुलं पिष्टमाकर्षे मुद्गपिष्टकम् ॥१०॥

संग्रामे केवलं माषं कृत्वा दीपं च पात्रके ।
सन्धौ त्रिपलजं प्रोक्तं लक्ष्मीः कस्तूरिका मता ॥११॥
एला - लवङ्ग - कर्पूर - मृगनाभिसुसंयुता ।
कन्यकावरणे राजवश्ये सर्वं तथैव च ॥१२॥
अलाभे सर्ववस्तूनां पञ्चधान्यं परं मतम् ।
अष्टमुष्टि भवेत् किञ्चित् किञ्चित् पिष्टं तु पुष्कलम् ॥१३॥
पञ्च सप्त तथा रौद्रं प्रमाणं च यथाक्रमम् ।
सुगन्धं नैव मानं स्याद्यथारुचि समं मतम् ॥१४॥
नित्यं दीपः प्रकर्त्तव्यस्ताम्रपात्रे हनूमतः ।
सोमवारे तथा ध्यात्वा जलाप्लावं च कारयेत् ॥१५॥
पश्चात् प्रमाणतो ग्राह्यं क्रमशो हस्तमानकम् ।
तत् पिष्टं शुद्धपात्रे तु नदीतोयेन शोधितम् ॥१६॥
दीपपात्रं ततः कुर्याच्छुद्धो नियतमानसः ।
दीपे पात्रे योज्यमाने मारुतेः कवचं पठेत् ॥१७॥

इति पात्रविधिः

मालानूनाश्च ये वर्णाः साध्यनामसमन्विताः ।
वर्तिकायाः प्रकर्तव्यास्तन्तवस्तत्प्रमाणतः ॥१८॥
त्रिशांशेनैव सा रम्या गुरुकार्येऽखिले मता ।
कूटतुल्या स्मृता नित्या सामान्याऽथ विशेषतः ॥१९॥
रुद्रकूटगुणा प्रोक्ता न पात्रं च विचालयेत् ।
एकविंशति-संख्याकास्तन्तवो निर्मला मताः ॥२०॥

रक्तसूत्रं हनुमतो दीपदाने प्रकीर्तितम् ।
कृष्णमुच्चाटने प्रोक्तं द्वेषमारणकर्मणि ॥२१॥
कट्टुतुल्यपलं तैलं गुरुकार्येऽष्टसंगुणम् ।
नित्ये पञ्चपलं प्रोक्तमथवा मनसो रुचिः ॥२२॥
हनुमत्प्रतिमायास्तु सन्निधौ दीपदापनम् ।
प्रतिमा दीपसहिता ग्रह-भूतग्रहेषु च ॥२३॥
चतुष्पथे तथा प्रोक्तं दीपदानमनन्तरम् ।
सन्निधौ स्फाटिके लिङ्गे शालग्रामस्य सन्निधौ ॥२४॥
नानाभोगाश्रयं प्रोक्तं दीपदानं हनूमतः ।
गणेशसन्निधौ विष्णोर्महासङ्कटनाशनम् ॥२५॥
विष-व्याधि-महाघोरे हनुमत्-सन्निधौ कुरु ।
दुर्गायाः सन्निधौ प्रोक्तं संग्रामे घोरसङ्कटे ॥२६॥
द्यूते वृष्टिस्थले चैव विशेषान् मारणे तथा ।
व्याधिनाशे तुण्डबन्धे दुष्टदृष्टौ तथैव च ॥२७॥
राजद्वारे बन्धमुक्तौ गुरुकार्ये प्रयत्नतः ।
गजस्य मस्तके चैव राज्यलक्ष्मीसमृद्धये ॥२८॥
स्त्रीवशीकरणे दीपो वापीतीरे सरोवरे ।
विप्र-क्षत्रिय-विट्-शूद्र-वश्ये विप्रालये शुभम् ॥२९॥
जपे पूर्वमुखः कार्यं उच्चाटे वायवः स्मृतः ।
सर्ववश्ये च कर्त्तव्यो दीपो याम्यदिशामुखः ॥३०॥
मारणे भेदकार्ये च कर्त्तव्यो राक्षसीमुखः ।
शान्तिके पौष्टिके सन्धौ कन्यापुत्राप्तये तथा ॥३१॥

अभिचारार्थसिद्ध्यर्थे दीपः कार्यो जलाश्रितः।
स्तम्भने भूतदमने शाकिनीनां च विग्रहे ॥३२॥
व्यन्तराणां च यक्षाणां पवनाभिमुखं कुरु।
धानेशो धन-धान्यादि राज्यलक्ष्मीसमृद्धये ॥३३॥
दीपः कार्यो महायोगे पान्थस्यागमनाय च।
ईशानाभिमुखः कार्यः सर्वऋद्धिविवृद्धये ॥३४॥
सर्वेषु गुरुकार्येषु राजपत्नीवशे तथा।
वृष्टेः समागमार्थाय देशस्योत्सादनाय च ॥३५॥
देवतासम्मुखः कार्यो दीपः शून्ये प्रकल्पयेत्।
वृष्टि-वृक्षादि-निष्पत्तौ दुर्गे तोयप्रशोषणे ॥३६॥
विवरादि-प्रवेशेषु भूमिस्थ-धनकर्षणे।
गण्डभेदेषु सर्वेषु शृङ्खलाबन्धमोचने ॥३७॥
खातं कृत्वा करोन्मानं चतुरस्रं सुशोभनम्।
तन्मध्ये स्थापयेद् दीपं दक्षिणाभिमुखं तथा ॥३८॥
